# संवित् स्तोत्र संग्रह



स्वामी ईश्वरानन्द गिरि

# संवित् स्तोत्र संग्रह

सर्वदेव स्तुतियाँ, मंगलश्लोकाः, आदित्य हृदय स्तोत्र,
अमोघ शिवकवचम्, नारायण हृदयम्
से समलंकृत

तन्मयो भवेत्

संकलन
**स्वामी ईश्वरानन्द गिरि**
आबू पर्वत

प्रकाशक
संवित् साधनायन
सन्तसरोवर, आबू पर्वत
पिन - ३०७५०१ (राजस्थान)

मूल्य : ४०.०० रूपये मात्र

सर्वाधिकार सुरक्षित
गुरूपूर्णिमा २००२

सन् २००२ - तृतीय संस्करण - २००० प्रतियां

मुद्रक :
डी.टी.पी. पॉइन्ट
२७-बी, महावीर कॉलोनी,
रातानाडा, जोधपुर
दूरभाष : ५१५१३०

# संवित् स्तोत्र संग्रहः

## विषयानुक्रमः


**मंगलश्लोकाः** ८

**प्रातः स्मरणम्** ९

**शिवस्तोत्राणि**

अमोघशिवकवचम् १३

शिवपंचाक्षर स्तोत्रम् १७

शिवमानसपूजा १८

माहेश्वर मार्गः १९

अर्धनारीनटेश्वर स्तोत्रम् २०

लिंङ्गाष्टकम् २१

शिवाष्टकम् २२

पशुपति-अष्टकम् २३

विश्वनाथाष्टकम् २४

कालभैरवाष्टकम् २५

वीरेश्वरस्तोत्रम् २७

सदाशिवस्तोत्रम् २८

उमामेहश्वर स्तोत्रम् २९

दारिद्र्यदुःखदहन स्तोत्रम् ३०

श्रीदाक्षिणामूर्ति वर्णमाला स्तोत्रम् ३१

श्री मेधादक्षिणामूर्ति वर्णपद स्तुतिः ३६

श्री मेधादक्षिणामूर्ति-मानसपूजा ३८

पंचाक्षरी नक्षत्रमाला ३९

| | |
|---|---|
| अष्टमूर्ति रक्षास्तोत्रम् | ४१ |
| नटेश स्तुतिः | ४३ |
| पतंजली कृत नटराजस्तोत्रम् | ४४ |
| चिदम्बरेश स्तुतिः | ४६ |
| शिववन्दन स्तोत्रम् | ४७ |
| शिवापराधक्षमापन स्तोत्रम् | ४९ |
| **शक्तिस्तोत्राणि** | |
| श्री कामाक्षी सुप्रभातम् | ५५ |
| ललिता पंचकम् | ५६ |
| मन्त्रमातृकापुष्पमाला स्तवः | ५७ |
| दुर्गा-आपदुद्धाराष्टकम् | ६१ |
| भवानीभुजंग प्रयातस्तोत्रम् | ६२ |
| शारदा भुजंग प्रयातष्टकम् | ६४ |
| श्रीगौरीदशकम् | ६५ |
| आनन्दलहरी | ६७ |
| शिवकामसुन्दरी स्तोत्रम् | ७१ |
| कुमारी तर्पण स्तोत्रम् | ७२ |
| नवरत्नमाला | ७३ |
| शान्तिस्तवः | ७४ |
| प्रलापस्तुतिः | ७६ |
| श्रीसूक्तार्थसग्रंहः | ७७ |
| श्री सरस्वतीदशश्लोकी | ७९ |
| देव्यपराधक्षमापन स्तोत्रम् | ८० |

## विष्णुस्तोत्राणि


| | |
|---|---|
| नारायण हृदयम् | ८५ |
| षट्पदी स्तोत्रम् | ८७ |
| भगवन् मानसपूजा | ८८ |
| कृष्णाष्टकम् | ९० |
| अच्युताष्टकम् | ९२ |
| चर्पटपंजरिका स्तोत्रम् | ९३ |
| श्रीरामस्तोत्रम् | ९४ |
| रामरक्षा स्तोत्रम् | ९६ |


## विविधदेवता स्तोत्राणि


| | |
|---|---|
| गणेश कवचम् | ९९ |
| गणेश पंचरत्नम् | १०१ |
| श्री गणेश लीलास्तवम् | १०२ |
| स्कन्द स्तोत्रम् | १०३ |
| नन्दिकेश स्तुतिः | १०४ |
| आदित्यहृदय स्तोत्रम् | १०५ |
| सूर्यस्तोत्रम् | १०८ |
| पंचदेवस्तोत्रम् | १०९ |
| श्रीहनुमदष्टकम् | ११० |
| श्रीमद्भगवद्गीता-नामस्तोत्रम् | ११२ |
| भारती -मंगल स्तोत्रम् | ११४ |
| भारत तीर्थ स्मरणम् | ११५ |
| गंगाष्टकम् | ११५ |

गंगास्तोत्रम् ११७
नर्मदाष्टकम् ११८
नर्मदा स्तोत्रम् १२०
यमुनाष्टकम् १२१
अर्बुदाचलस्तुतिः १२२

**गुरुस्तोत्राणि**

श्रीवेदव्यासाष्टकम् १२५
श्री शंकरभगवत्पाद स्तुतिः १२६
श्री गुरुशरणागति स्तोत्रम् १२७
श्री गुरुभजनस्तोत्रम् १२८
श्री शंकर कृतं गुरुपादुका पंचकम् १२९
श्री शिवगुरु स्तोत्रम् १३०
गुरुमीडे स्तवरत्नम् १३१

**वेदान्तस्तोत्राणि**

ब्रह्मविद्योपासना १३५
विज्ञान नौका १३६
धन्याष्टकम् १३७
हस्तामलक स्तोत्रम् १३८
निर्वाणषट्कम् १४०
ब्रह्मज्ञाना वलीमाला १४१
श्रीगुरूवंदना १४३

ॐ

# संवित् स्तोत्र संग्रह

## प्रकाशकीय

"स्तुति सन्दोह" का प्रथम संस्करण सन् १९८० में प्रकाशित हुआ था । उसकी बढती माँग को देख कर हमने सन् १९९३ में द्वितीय संस्करण मुद्रित किया था । इसमें स्तुतियों का संशोधन व संवर्द्धन किया गया था । उसकी प्रतियाँ भी अब उपलब्ध नहीं होने से संवित् साधकों की आवश्यकता को देखते हुए " संवित् स्तोत्र संग्रह" प्रस्तुत कर रहे हैं। मूल संस्करण में किये गये प्रचुर परिर्वतनों के कारण नया नामकरण उचित लगा ।" स्तुति सन्दोह" के प्राणभूत श्री शिवमहिम्न स्तोत्र को श्रीसोमनाथ मन्दिर की सायं-प्रात: कालीन आरती में प्रयुक्त अन्य साहित्य के साथ वहाँ के उपासकों की सुविधा के लिये "शिवाराधना" नाम से अलग प्रकाशित किये हैं। पूर्व संस्करण में विद्यमान रुद्रहृदयउपनिषद्, हरिमीडे आदि स्तोत्रों की जगह नूतन स्तोत्र जोडे गये हैं ।" संवित् सपर्या" में ही संकलित होने से नामावलियों को यहाँ देना आवश्यक प्रतीत नहीं हुआ ।हमें पूर्ण आशा है कि यह "संग्रह" संवित् साधकों को अधिक आकर्षक व उपयोगी सिद्ध होगा ।

सूर्यनगरी के एक संवित् साधक के उदार अनुदान से यह प्रकाशन संभव हो सका। प्रकाशन कार्य में श्री महेश हर्ष एवं अनेक संवित् तरुओं का श्लाघनीय सहायोग रहा । इन सबके हम आभारी हैं।

श्री राम नवमी प्रकाशक

२१-४-२००२

# मंगलश्लोकाः

ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।
कंठं भित्त्वा विनिर्यातौ तस्मान् मांगलिकावुभौ ॥

## देवमंगलम्

ब्रह्मा वेदपतिः शिवः पशुपतिः सूर्यश्च चक्षुष्पतिः
शक्रो देवपतिर्यमः पितृपतिः स्कन्दश्च सेनापतिः ।
यक्षो वित्तपतिर्हरिश्च जगतां वायुः पतिः प्राणिनाम्
इत्येता पतयः समेत्य सततं कुर्वन्तु नो मंगलम् ॥

## तीर्थ मंगलम्

गंगा सिन्धुसरस्वती च यमुना गोदावरी नर्मदा
कावेरी सरयूमहीन्द्रतनया चर्मण्वती वेदिका ।
क्षिप्रा वेत्रवती महासुरनदी ख्याता च या गण्डकी
पूर्णाः पूर्णजलैः समुद्रसहिताः कुर्वन्तु नो मंगलम् ॥

## रत्नमंगलम्

लक्ष्मीः कौस्तुभपारिजातकसुरा धन्वन्तरिश्चन्द्रमा
गावः कामदुघाः सुरेश्वरगजो रंभादि देवाङ्गनाः ।
अश्वः सप्तमुखः सुधाहरिधनुः शंखो विषं चाम्बुधेः
रत्नानीति चतुर्दश प्रतिदिनं कुर्वन्तु नो मंगलम् ॥

# प्रातः स्मरणम्

## परब्रह्मणः

प्रातः स्मरामि हृदि संस्फुरदात्मतत्त्वं
सच्चित्सुखं परमहंसगतिं तुरीयम् ।
यः स्वप्नजागरसुषुप्तिमवैति नित्यं
तद्ब्रह्म निष्कलमहं न च भूतसङ्घः ॥१ ॥

प्रातर्भजामि मनसो वचसामगम्यं
वाचो विभान्ति निखिला यदनुग्रहेण ।
यन्नेतिनेतिवचनैर्निगमा अवोचुः
तं देवदेवमजमच्युतमाहुरग्र्यम् ॥२ ॥

प्रातर्नमामि तमसः परमर्कवर्णं
पूर्णं सनातनपदं पुरुषोत्तमाख्यम् ।
यस्मिन्निदं जगदशेषमशेषमूर्तौ
रज्ज्वां भुजङ्गम इव प्रतिभासितं वै ॥३ ॥

श्लोकत्रयमिदं पुण्यं लोकत्रयविभूषणम् ।
प्रातः काले पठेद्यस्तु स गच्छेत्परमम् पदम् ॥

## श्री गणेशस्य

प्रातः स्मरामि गणनाथमनाथबन्धुं
सिन्दूरपूरपरिशोभितगण्डयुग्मम् ।
उद्दण्डविघ्नपरिखण्डनचण्डदण्डमाखण्डं -
लादिसुरनायकवृन्दवंद्यम् ॥१ ॥

प्रातर्नमामि चतुराननवन्द्यमानम्
इच्छानुकूलमखिलं च वरं ददानम् ।
तं तुन्दिलं द्विरसनाधिपयज्ञसूत्रं
पुत्रं विलासचतुरं शिवयोः शिवाय ॥२ ॥

प्रातर्भजाम्यभयदं खलु भक्तशोक-
दावानलं गणविभुं वरकुञ्जरास्यम् ।
अज्ञानकाननविनाशनहव्यवाहम्
उत्साहवर्धनमहं सुतमीश्वरस्य ॥३ ॥

## श्री शिवस्य

प्रातः स्मरामि भवभीतिहरं सुरेशं गङ्गाधरं वृषभवाहनमम्बिकेशम् ।
खट्वाङ्गशूलवरदाभयहस्तमीशं संसाररोगहरमौषधमद्वितीयम् ॥१ ॥

प्रातर्नमामि गिरिशं गिरिजार्धदेहं सर्गस्थितिप्रलयकारणमादिदेवम् ।
विश्वेश्वरं विजितविश्वमनोऽभिरामं संसाररोगहरमौषधमद्वितीयम् ॥२ ॥

प्रातर्भजामि शिवमेकमनन्तमाद्यं वेदान्तवेद्यमनघं पुरुषं महान्तम् ।
नामादिभेदरहितं षड्भावशून्यं संसाररोगहरमौषधमद्वितीयम् ॥३ ॥

प्रातः समुत्थाय शिवं विचिन्त्य श्लोकत्रयं येनुदिनं पठन्ति ।
ते दुःखजातं बहुजन्मसञ्चितं हित्वा पदं यान्ति तदेव शम्भोः ॥४ ॥

## श्री विष्णोः

प्रातः स्मरामि भवभीतिमहार्तिशान्त्यैः नारायणं गरुडवाहनमब्जनाभम् ।
ग्राहाभिभूतवरवारणमुक्तिहेतुं चक्रायुधं तरुणवारिजपत्रनेत्रम् ॥१ ॥

प्रातर्नमामि मनसा वचसा च मूर्ध्ना पादारविन्दयुगलं परमस्य पुंसः ।
नारायणस्य नरकार्णवतारणस्य पारायणप्रवणविप्रपरायणस्य ॥२ ॥

प्रातर्भजामि भजतामभयङ्करं तं प्राक्सर्वजन्मकृतपापभयापहत्यैः ।
यो ग्राहवक्त्रपतिताङ्घ्रिगजेन्द्रघोरशोकप्रणाशकरणोधृतशङ्खचक्रः ॥३ ॥


शिवस्तोत्राणि

# अमोघ-शिवकवचम्

ॐ अस्य श्री शिवकवचस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः , अनुष्टुप् छन्दः श्रीसदाशिवरुद्रो देवता, ह्रीं बीजम्, सदाशिवप्रीत्यर्थे शिवकवचस्तोत्रजपे विनियोगः ।

## अङ्गन्यास - करन्यास :

ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ ह्रीं रां

सर्वशक्तिधाम्ने ईशानात्मने (अंगुष्ठाभ्यां नमः) ॥ (हृदयाय नमः)

ॐ नमो भगवते ज्वलज्जवालामालिने ॐ नं रीं

नित्यतृप्तिधाम्ने तत्पुरुषात्मने (तर्जनीभ्यां नमः) ॥ (शिरसे स्वाहा)

ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ मं रूं

अनादिशक्तिधाम्ने अघोरात्मने (मध्यमाभ्यां नमः) ॥(शिखायै वषट्)

ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ शिं रैं

स्वतन्त्रशक्तिधाम्ने वामदेवात्मने (अनामिकाभ्यां नमः) ॥ (कवचाय हुम्)

ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ वां रौं

अलुप्तशक्तिधाम्ने सद्योजातात्मने (कनिष्ठिकाभ्यां नमः) ॥ (नेत्रत्रयाय वौषट्)

ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ यं रः

अनादिशक्तिधाम्ने सर्वात्मने (करतलकरपृष्ठाभ्यां नमः) ॥ (अस्त्राय फट्)

## अथ ध्यानम्

वज्रदंष्ट्रं त्रिनयनं कालकण्ठमरिन्दमम् ।
सहस्रकरमत्युग्रं वन्दे शम्भुमुमापतिम् ॥

## ऋषभ उवाच

अथापरं सर्वपुराणगुह्यं निःशेषपापौघहरं पवित्रम् ।
जयप्रदं सर्वविपत्प्रमोचनं वक्ष्यामि शैवं कवचं हिताय ते ॥१ ॥

नमस्कृत्य महोदवं विश्वव्यापिनमीश्वरम् ।
वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणाम् ॥२ ॥

शुचौ देशेसमासीनो यथावत्कल्पितासनः ।
जितेन्द्रियो जितप्राणश्चिन्तयेच्छिवमव्ययम् ॥३ ॥

हृत्पुण्डरीकान्तरसन्निविष्टं स्वतेजसा व्याप्तनभोऽवकाशम् ।
अतीन्द्रियं सूक्ष्ममनन्तमाद्यं ध्यायेत्परानन्दमयं महेशम् ॥४ ॥

ध्यानावधूताखिलकर्मबन्धश्चिरं चिदानन्दनिमग्नचेताः ।
षडक्षरन्याससमाहितात्मा शैवेन कुर्यात्कवचेन रक्षाम् ॥५ ॥

मां पातु देवोऽखिलदेवतात्मा संसारकूपे पतितं गभीरे ।
तन्नाम दिव्यं वरमन्त्रमूलं धुनोतु मे सर्वमघं हृदिस्थम् ॥६ ॥

सर्वत्र मां रक्षतु विश्वमूर्तिर्ज्योतिर्मयानन्दघनश्चिदात्मा ।
अणोरणीयानुरुशक्तिरेकः स ईश्वरः पातु भयादशेषात् ॥७ ॥

योभूस्वरूपेण बिभर्ति विश्वं पायात्स भूमेर्गिरिशोऽष्टमूर्तिः ।
योऽपां स्वरूपेण नृणां करोति संजीवनं सोऽवतु मां जलेभ्यः ॥८ ॥

कल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिलीलः ।
स कालरुद्रोऽवतु मां दवाग्नेर्वात्यादिभीतेरखिलाच्च तापात् ॥९ ॥

प्रदीप्तविद्युत्कनकावभासो विद्यावराभीतिकुठारपाणिः ।
चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां स्थितं रक्षतु मामजस्रम् ॥१० ॥

कुठारवेदांकुशपाशशूलकपालढक्काक्षगुणानन्दधानः ।
चतुर्मखो नीलरुचिस्त्रिनेत्रः पायादघोरो दिशि दक्षिणस्याम् ॥११ ॥

कुन्देन्दुशङ्खस्फटिकावभासो वेदाक्षमालावरदाभयाङ्कः ।
त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः सद्योधिजातोऽवतु मां प्रतीच्याम् ॥१२ ॥

वराक्षमालाभयटंकहस्त: सरोजकिञ्जल्कसमानवर्ण: ।
त्रिलोचनश्चारुचतुर्मुखो मां पायादुदीच्यां दिशि वामदेव: ॥१३ ॥

वेदाभयेष्टाकुशपाशटङ्ककपालढक्काक्षकशूलपाणि: ।
सितद्युति: पञ्चमुखोऽवतान्मामीशान ऊर्ध्वे परमप्रकाश: ॥१४ ॥

मूर्धानमव्यान्मम चन्द्रमौलिर्भालं ममाव्यादथ भालनेत्र: ।
नेत्रे ममाव्याद्भगनेत्रहारी नासां सदा रक्षतु विश्वनाथ: ॥१५ ॥

पायाच्छ्रुती मे श्रुतिगीतकीर्ति: कपोलमव्यात्सततं कपाली ।
वक्त्रं सदा रक्षतु पञ्चवक्त्रो जिह्वां सदा रक्षतु वेदजिह्व: ॥१६ ॥

कण्ठं गिरीशोऽवतु नीलकंठ: पाणिद्वयं पातु पिनाकपाणि: ।
दोर्मूलमव्यान्मम धर्मबाहुर्वक्ष: स्थलं दक्षमखान्तकोऽब्यात् ॥१७ ॥

ममोदरं पातु गिरिन्द्रधन्वा मध्यं ममाव्यान्मदनान्तकारी ।
हेरम्बतातो मम पातु नाभिं पायात्कटिं धूर्जटिरीश्वरो मे ॥१८ ॥

उरुद्वयं पातु कुबेर मित्रो जानुद्वयं मे जगदीश्वरोव्यात् ।
जङ्घायुगं पुङ्गवकेतुरव्यात् पादौ मथव्यात्सुरवन्द्यपाद: ॥१९ ॥

महेश्वर: पातु दिनादियामे मां मध्ययामेऽवतु वामदेव: ।
त्रिलोचन: पातु तृतीययामे वृषध्वज: पातु दिनान्त्ययामे ॥२० ॥

पायान्निशादौ शशिशेखरो मां गङ्गाधरो रक्षतु मां निशीथे ।
गौरीपति: पातु निशावसाने मृत्युञ्जयो रक्षतु सर्वकालम् ॥२१ ॥

अन्त:स्थितं रक्षतु शंकरो मां स्थाणु : सदा पातु बहि: स्थितं मांम् ॥
तदन्तरे पातु पति: पशुनां सदाशिवो रक्षतु मां समन्तात् ॥२२ ॥

तिष्ठन्तमव्याद्भुवनैकनाथ: पायाद्व्रजन्तं प्रमथाधिनाथ: ।
वेदान्तवेद्योऽवतु मां निषण्णं मामव्यय: पातु शिव: शयानम् ॥२३ ॥

मार्गेषु मां रक्षतु नीलकण्ठ: शैलादिदुर्गेषु पुरत्रयारि ।
अरण्यवासादिमहाप्रवासे पायान्मृगव्याध उदारशक्ति : ॥२४ ॥

कल्पान्तकाटोपपटुप्रकोपस्फुटाट्टहासोच्चलिताण्डकोशः ।
घोरारिसेनार्णवदुर्निवारमहाभयाद्रक्षतु वीरभद्रः ॥२५ ॥

पत्त्यश्वमातङ्गघटावरूथसहस्रलक्षायुतकोटिभीषणम् ।
अक्षौहिणीनां शतमाततायिनां छिन्द्यान्मृडो घोरकुठारधारया ॥२६ ॥

निहन्तु दस्यून्-प्रलयानलार्चिर्ज्वलत्त्रिशूलं त्रिपुरान्तकस्य ।
शार्दूलसिंहर्क्षवृकादिहिंस्रान्संत्रासय-त्वीशधनुः पिनाकः ॥२७ ॥

दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि ।
उत्पाततापविषभीतिमसद्ग्रहार्तिव्याधींश्च नाशयतु मे जगतामधीशः ॥२८ ॥

## मन्त्रः

ॐ नमो भगवते सदाशिवाय सकलतत्त्वात्मकाय सर्वमन्त्र-स्वरूपाय सर्वयन्त्रधिष्ठिताय सर्वतन्त्रस्वरूपाय सर्वतत्त्वविदूराय ब्रह्मरुद्रावतारिणे नीलकण्ठाय पार्वतीमनोहरप्रियाय सोमसूर्याग्नि-लोचनाय भम्मोद्धूलितविग्रहाय महामणिमुकुटधारणाय माणिक्यभूषणाय सृष्टिस्थितिप्रलयकालरौद्रावताराय दक्षाध्वरध्वंसकाय महाकालभेदनाय मूलाधारैकनिलयाय तत्त्वातीताय गङ्गाधराय सर्वदेवाधिदेवाय षडाश्रयाय वेदान्तसाराय त्रिवर्गसाधनाय अनन्तकोटिब्रह्माण्डनाय - काय अनन्तवासुकि तक्षक कर्कोटक शङ्ख कुलिक पद्ममहापद्मेत्यष्टमहानागकुल-भूषणाय प्रणवस्वरूपाय चिदाकाशाय आकाशदिक्स्वरूपाय ग्रहनक्षत्रमालिने सकलाय कलङ्करहिताय सकललोकैककर्त्रे सकललोकैकभर्त्रे सकललोकैकसंहर्त्रे सकललौकैकगुरवे सकललोकैकसाक्षिणे सकलनिगमगुह्याय सकलवेदान्तपारगाय सकललोकैकवरप्रदाय सकललौकैकशङ्कराय शशांङ्कशेखराय शाश्वतनिजावासाय निराभासाय निरामयाय निर्मलाय निर्लोभाय निर्मोहाय निर्मदाय निश्चिन्ताय निरहङ्काराय निरंकुशाय निष्कलंकाय निर्गुणाय निष्कामाय निरुपप्लवाय निरवद्याय निरन्तराय निष्कारणाय निरन्तकाय निष्प्रपञ्चाय निःसंगाय निर्द्वन्द्वाय निराधाराय नीरागाय निष्क्रोधाय निर्गमाय निष्पापाय निर्भयाय निर्विकल्पाय निर्भेदाय निष्क्रियाय निस्तुलाय निःसंशयाय निरञ्जनाय निरुपमविभवाय नित्यशुद्धबुद्ध परिपूर्णसच्चिदानन्दाद्वयाय परमशान्तस्वरूपाय तेजोरूपाय तेजोमयाय जय जय रुद्र महारौद्र भद्रावतार महाभैरव कालभैरव कल्पान्तभैरव कपालमालाधर खट्वाङ्ग-खड्ग- चर्म - पाशांकुश - डमरु - शूल - चाप - बाण - गदा- शक्ति-भिन्दपाल- तोमर- मुसल- मुद्गर - प्रासपरिघ- भुशुण्डी- शतघ्नी-

चक्राद्यायुधभीषणकर सहस्रमुख दंष्ट्राकरालवदन विकटाट्टहासविस्फारित-ब्रह्माण्डमण्डल नागेन्द्रकुण्डल नागेन्द्रहार नागेन्द्रवलय नागेन्द्रचर्मधर मृत्युञ्जय त्र्यम्बक त्रिपुरान्तक विश्वरूप विरूपाक्ष विश्वेश्वर वृषभवाहन विषविभूषण विश्वतोमुख सर्वतो रक्ष रक्ष मां ज्वल ज्वल महामृत्युमपमृत्युभयं नाशय नाशय चोरभयमुत्सादयोत्सादय विषसर्पभयं शमय शमय चोरान्मारय मारय मम शत्रूनुच्चाटयोच्चाटय त्रिशूलेन विदारय विदारय कुठारेण भिन्धि भिन्धि खड्गेन छिन्धि छिन्धि खट्वाङ्गेन विपोथय विपोथय मुसलेन निष्पेषय निष्पेषय बाणैः संताडय संताडय रक्षांसि भीषय भीषय अशेषभूतानि विद्रावय विद्रावय, कूष्माण्डवेताल मारीचब्रह्मराक्षसगणान् संत्रासय संत्रासय, ममाभयं कुरु कुरु, वित्रस्तं मामाश्वासयाश्वासय, नरकमहाभयान्मामुद्धरोद्धर संजीवय संजीवय, क्षुत्तृड्भ्यां मामाप्यायय आप्यायय दुःखातुरं मामानन्दयानन्दय शिवकवेचन मामाच्छादयाच्छादय, मृत्युञ्जय त्र्यम्बक सदाशिव नमस्ते नमस्ते ।

## शिवपञ्चाक्षरस्तोत्रम्

नागेन्द्रहाराय त्रिलोचनाय भस्मांगरागाय महेश्वराय ।
नित्याय शुद्धाय दिगम्बराय तस्मै नकाराय नमः शिवाय ॥१ ॥

मंदाकिनीसलिलचंदनचर्चिताय नन्दीश्वरप्रमथनाथमहेश्वराय ।
मंदारपुष्पबहुपुष्पसुपूजिताय तस्मै मकाराय नमः शिवाय ॥२ ॥

शिवाय गौरीवदनाब्जवृन्दसूर्याय दक्षाध्वरनाशकाय ।
श्रीनीलकण्ठायवृषध्वजाय तस्मै शिकाराय नमः शिवाय ॥३ ॥

वसिष्ठकुम्भोद्भवगौतमार्य मुनीन्द्रदेवार्चितशेखराय ।
चन्द्रार्कवैश्वानरलोचनाय तस्मै वकाराय नमः शिवाय ॥४ ॥

यक्षस्वरूपाय जटाधराय पिनाकहस्ताय सनातनाय ।
दिव्याय देवाय दिगम्बराय तस्मै यकाराय नमः शिवाय ॥५ ॥

पञ्चाक्षरमिदं पुण्यं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥६ ॥

इति श्रीशंकराचार्यविरचितं स्तोत्रं संपूर्णम्

# शिवमानसपूजा

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं
नानारत्नविभूषितं मृगमदामोदांङ्कितं चन्दनम् ।
जातीचम्पक-बिल्वपत्ररचितं पुष्पं च धुपं तथा
दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥१ ॥
सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं
भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम् ।
शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्जवलं
ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकरु ॥२ ॥
छत्रं चामरयोर्युगं व्यजनकं चादर्शक निर्मलं
वीणाभेरिमृदंङ्गकाहलकला गीतं च नृत्यं तथा ।
साष्टांगं प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया
संकल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥३ ॥
आत्मा त्वं गिरिजा मतिः सहचरा प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ।
सञ्चारः पादयोः प्रदक्षिणविधिः स्तोत्राणि सर्वागिरो
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥४ ॥
करचरणकृतं वाक्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वापराधम् ।
विदितमविदितं वा सर्वमेतत्क्षमस्व
जय जय करुणाब्धे श्री महादेव शम्भो ॥५ ॥

इति श्रीशंकराचार्यविरचितं शिवमानसपूजास्तोत्रं समाप्तम्

# माहेश्वर मार्गः

**(श्रीमदुत्पलदेवाचार्य विरचित श्री शिवस्तोत्रावली से संकलित)**

सर्वाशंकाशनिं सर्वालक्ष्मीकालानलं तथा ।
सर्वामंगल्यकल्पान्तं मार्गं माहेश्वरं नमः ॥१ ॥

उपहासैक सारेस्मिन् एतावति जगत्त्रये ।
तुभ्यमेवाद्वितीयाय नमो नित्यसुखासिने ॥२ ॥

न योगो न तपो नार्चा - क्रमः कोपि प्रणीयते ।
अगाये शिवमार्गेस्मिन् भक्तिरेका प्रशस्यते ॥३ ॥

चित्रं निसर्गता नाथ दुःखबीजमिदं मनः ।
त्वद्भक्तिरससंसिक्तं निःश्रेयसमहाफलं ॥४ ॥

त्वच्चिदानन्द जलधेः च्युता संवित्तिविप्रुषः ।
इमा कथं मे भगवन् नामृतास्वाद सुन्दराः ॥५ ॥

स्वसंवित्सार हृदया - धिष्ठानाः सर्वदेवताः ।
कदा नाथ वशीकुर्यां भवद् भक्ति प्रभावतः ॥६ ॥

अशेषवासनाग्रंन्थि - विच्छेदसरलं सदा ।
मनो निवेद्यते भक्तैः स्वादुपूजाविधौ तव ॥७ ॥

हर्षाणामथ शोकानां सर्वेषां प्लावकः समम् ।
भवद्ध्यानामृतापूरो निम्नानिम्न भुवामिव ॥८ ॥

ध्यानामृतमयं यस्य स्वात्ममूलमनश्वरम् ।
संविल्लतास्तथारूपाः तस्य कस्यापि सत्तरोः ॥९ ॥

भर्ता कालान्तको यत्र भवांस्तत्र कुतो रुजः ।
तत्र चेतरभोगाशा का लक्ष्मीर्यत्र तावकी ॥१० ॥

दुःखान्यपि सुखायन्ते विषमप्यमृतायते ।
मोक्षायते च संसारो यत्र मार्गः स शांकरः ॥११ ॥

न क्वापि गत्वा हित्वापि न किंचिदिदमेव ये ।
भव्यं त्वद्धाम पश्यन्ति भव्यास्तेभ्यो नमो नमः ॥१२ ॥

# अर्धनारीनटेश्वरस्तोत्रम्

चाम्पेयगौरार्धशरीरकायै कर्पूरगौरार्धशरीरकाय ।
धम्मिल्लकायै च जटाधराय नमः शिवायै च नमः शिवाय ॥१ ॥

कस्तूरिकाकुंकुमचर्चितायै चितारजः पुञ्जविचर्चिताय ।
कृतस्मरायै विकृतस्मराय नमः शिवायै च नमः शिवाय ॥२ ॥

चलत्क्वणत्कङ्कणनूपुरायै मिलत्फणाभासुरनूपुराय ।
हेमाङ्गदायै भुजगाङ्गदाय नमः शिवायै.. ॥३ ॥

विलोलनीलोत्पललोचनायै विकासिपंकेरुहलोचनाय ।
समेक्षणायै विषमेक्षणाय नमः शिवायै.. ॥४ ॥

मन्दारमालाकलितालकायै कपालमालाङ्कित-कन्धराय ।
दिव्याम्बरायै च दिगम्बराय नमः शिवायै.. ॥५ ॥

अम्भोधरश्यामलकुन्तलायै तडित्प्रभाताम्रजटाधराय ।
गिरीश्वरायै निखिलेश्वराय नमः शिवायै.. ॥६ ॥

प्रपञ्चसृष्ट्युन्मुखलास्यकायै समस्तसंहारकताण्डवाय ।
जगज्जनन्यै जगदेकपित्रे नमः शिवायै.. ॥७ ॥

प्रदीप्तरत्नोज्जवलकुण्डलायै स्फुरन्महापन्नगभूषणाय ।
शिवान्वितायै च शिवान्विताय नमः शिवायै.. ॥८ ॥

इति श्रीशंकराचार्यविरचितं स्तोत्रं संपूर्णम्

# लिङ्गाष्टकम्

ब्रह्ममुरारिसुरर्चितलिङ्गं निर्मलभासितशोभितलिङ्गम् ।
जन्मजदु:खविनाशकलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम् ॥१ ॥

देवमुनिप्रवरार्चितलिङ्गं कामदहं करुणकरलिङ्गम् ।
रावणर्पविनाशनलिङ्गं तत्प्रणमामि .. ॥२ ॥

सर्वसुगन्धिसुलेपितलिङ्गं बुद्धिविवर्धनकारणलिङ्गम् ।
सिद्धसुरासुरवन्दितलिङ्गं तत्प्रणमामि .. ॥३ ॥

कनकमहामणिभूषितलिङ्गं फणिपतिवेष्टितशोभितलिङ्गम् ।
दक्षसुयज्ञविनाशनलिङ्गं तत्प्रणमामि .. ॥४ ॥

कुंकुमचन्दनलेपितलिङ्गं पकंजहारसुशोभितलिङ्गम् ।
सञ्चिततापविनाशनलिङ्गं तत्प्रणमामि .. ॥५ ॥

भूतगणार्चितसेवितलिङ्गं भावैर्भक्तिभिरेव च लिङ्गम् ।
दिनकरकोटिप्रभाकरलिङ्ग तत्प्रणमामि .. ॥६ ॥

अष्टदलोपरिवेष्टितलिङ्गं सर्वसमुद्भवकारणलिङ्गम् ।
अष्टदरिद्रविनाशितलिङ्गं तत्प्रणमामि .. ॥७ ॥

सुरगुरुसुरवरपूजितलिङ्गं सुरवनपुष्पसदार्चितलिङ्गम् ।
परात्परं परमात्मकलिङ्गं तत्प्रणमामि .. ॥८ ॥

लिङ्गांष्टकमिदं पुण्यं य: पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥

इति श्री लिङ्गांष्टकं संपूर्णम्

# शिवाष्टकम्

प्रभुं प्राणानथं विभुं विश्वनाथं जगन्नाथनाथं सदानन्दभाजम् ।
भवद्भव्य भूतेश्वरं भूतनाथं शिवं शंकरं शंभुमीशानमीडे ॥१ ॥

गले रुण्डमालं तनौ सर्पजालं महाकालकालं गणेशाधिपालम् ।
जटाजूटभंगोत्तरंगैर्विशालं शिवं शंकरं..... ॥२ ॥

मुदामाकरं नीलकंठं प्रशान्तं कलाशेखरं भस्मभूषाधरंतम् ।
दशास्यारिमालिङ्ग्यन्तं महान्तं शिवं शंकरं..... ॥३ ॥

वटाधोनिवासं मुखे मन्दहासं सदा मौनमुद्रं सुतत्त्वप्रकाशम् ।
महामोहनाशं परं देशिकेशं शिवं शंकरं..... ॥४ ॥

गिरीन्द्रात्मजासंगृहीतार्धदेहं गिरौ संस्थितं सर्वदासन्नगेहम् ।
परब्रह्म श्रुत्योक्तिमाश्रित्य सोऽहं शिवं शंकरं ..... ॥५ ॥

कपालं त्रिशूलं कराभ्यां दधानं पदांभोजनम्राय कामं ददानम् ।
बलीवर्दयानं सुराणां प्रधानं शिवं शंकरं.... ॥६ ॥

हरं सर्पहारं चिताभूविहारं भवं वेदसारं सदा निर्विकारम् ।
श्मशाने वसन्तं मनोजं दहन्तं शिवं शंकरं..... ॥७ ॥

शरच्चन्द्रगात्रं गुणाधारपात्रं त्रिनेत्रं पवित्रं धनेशस्य मित्रम् ।
परासंविदम्बा-कलत्रं विचित्रं शिवं शंकरं.... ॥८ ॥

स्तवं यः प्रभाते नरः शूलपाणेः पठेत् सर्वदा भर्गभावानुरक्तः ।
स पुत्रं धनं धान्यमित्रं कलत्रं विचित्रः समासाद्य मोक्षं प्रयाति ॥

श्री शिवाष्टकम् संपूर्णम्

# पशुपत्यष्टकम्

पशुपतिंद्युपतिं धरणीपतिं भुजगलोकपतिं च सतीपतिम् ।
प्रणतभक्तजनार्तिहरं परं भजत रे मनुजा गिरिजापतिम् ॥१ ॥

न जनको जननी न च सोदरो न तनयो न च भूरिबलं कुलम् ।
अवति कोऽपि न कालवशं गतं भजत रे मनुजा गिरिजापतिम् ॥२ ॥

मुरजडिंडिमवाद्यविलक्षणं मधुरपञ्चमनादविशारदम् ।
प्रमथभूतगणैरपि सेवितं भजत रे.. ॥३ ॥

शरणदं सुखदं शरणान्वितं शिव शिवेति शिवेति नतं नृणाम् ।
अभयदं करुणावरुणालयं भजत रे.. ॥४ ॥

नरशिरोरचितं मणिकुँडलं भुजगहारमुदं वृषभध्वजम् ।
चितिरजोधवलीकृतविग्रहं भजत रे.. ॥५ ॥

मखविनाशकरं शशिशेखरं सततमध्वरभाजिफलप्रदम् ।
प्रलयदग्धसुरासुरमानवं भजत रे.. ॥६ ॥

मदमपास्य चिरं हृदिसंस्थितं मरणजन्मजराभयपीडितम् ।
जगदुदीक्ष्य समीपभयाकुलं भजत रे.. ॥७ ॥

हरिविरिञ्चिसुराधिपपूजितं यमजनेशधनेशनमस्कृतम् ।
त्रिनयनं भुवनत्रितयाधिपं भजत रे.. ॥८ ॥

पशुपतेरिदमष्टकमद्भुतं विरचितं पृथ्वीपतिसूरिणा ।
पठति संश्रुणुते मनुजः सदा शिवपुरीं वसते लभते मुदम् ॥९ ॥

इति पशुपत्यष्टकं संपूर्णम्

# विश्वनाथाष्टकम्

गङ्गांतरङ्गं-रमणीय-जटाकलापं, गौरीनिरन्तर-विभूषित-वामभागम् ।
नारायणप्रियमनङ्गंमदापहारं, वाराणसीपुरपतिं भज विश्वनाथम् ॥१ ॥

वाचामगोचरमनेकगुणस्वरूपं, वागीश-विष्णु-सुरसेवित-पादपीठम् ।
वामेन विग्रहवरेण कलत्रवन्तं, वाराणसीपुरपतिं भज विश्वनाथम् ॥२ ॥

भूताधिपं भुजग-भूषण भूषिताङ्गं, व्याघ्राजिनाम्बरधरं जटिलं त्रिनेत्रम्
पाशांकुशा-भयवरप्रद-शूलपाणिं, वाराणसीपुरपतिं भज विश्वनाथम् ॥३ ॥

शीतांशु-शोभित-किरीट-विराजमानं भालेक्षणानल-विशोषित-पञ्चबाणम्
नागाधिपा-रचित-भासुरकर्णपूरं, वाराणसीपुरपतिं भज विश्वनाथम् ॥४ ॥

पञ्चाननं दुरितमत्त-मतङ्गंजानां, नागान्तकं दनुजपुङ्गव-पन्नगानाम् ।
दावानलं मरण-शोक-जराटवीनां, वाराणसीपुरपतिं भज विश्वनाथम् ॥५ ॥

तेजोमयं सगुण-निर्गुणमद्वितीय-मानन्द-कन्दमपराजितमप्रमेयम्
नागात्मकं सकल-निष्कलमात्मरूपं, वाराणसीपुरपतिं भज विश्वनाथम् ॥६ ॥

आशां विहाय परिहृत्य परस्य निन्दां, पापे मतिं च सुनिवार्य मनः समाधौ ।
आदाय हृत्कमलमध्यगतं परेशं, वाराणसीपुरपतिं भज विश्वनाथम् ॥७ ॥

रागादिदोषरहितं स्वजनानुरागं, वैराग्यशान्तिनिलयं गिरिजासहायम् ।
माधुर्य-धैर्य-सुभगं गरलाभिरामं, वाराणसीपुरपतिं भज विश्वनाथम् ॥८ ॥

वाराणसीपुरपतेः स्तवनं शिवस्य, व्याख्यातमष्टकमिदं पठते मनुष्यः ।
विद्यां श्रियं विपुल-सौख्यमनन्तकीर्तिं, सम्प्राप्य देहविलये लभते च मोक्षम् । ।९ ॥

विश्वनाथाष्टकमिदं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥१० ॥

इति श्री महर्षिव्यासकृतं विश्वनाथाष्टकम् संपूर्णम्

# कालभैरवाष्टकम्

देवराजसेव्यमानपावनाङ्घ्रिपकंजं
व्यालयज्ञसूत्रमिन्दुशेखरं कृपाकरम् ।
नारदादियोगिवृन्दवन्दितं दिगम्बरं
काशिकापुराधिनाथकालभैरवं भजे ॥१ ॥

भानुकोटिभास्वरं भवाब्धितारकं परं
नीलकण्ठमीप्सितार्थदायकं त्रिलोचनम् ।
कालकालमम्बुजाक्षमक्षशूलमक्षरं
काशिकापुराधिनाथकालभैरवं भजे ॥२ ॥

शूलटंङ्कपाशदण्डपाणिमादिकारणं
श्यामकायमादिदेवमक्षरं निरामयम् ।
भीमविक्रमं प्रभुं विचित्रताण्डवप्रियं
काशिकापुराधिनाथकालभैरवं भजे ॥३ ॥

भक्तिमुक्तिदायकं प्रशस्तचारुविग्रहं
भक्तवत्सलं स्थिरं समस्तलोकविग्रहम् ।
निक्कूणन्मनोज्ञहेमकिङ्किंणीलसत्कटिं
काशिकापुराधिनाथकालभैरवं भजे ॥४ ॥

धर्मसेतुपालकं त्वधर्ममार्गनाशकं
कर्मपाशमोचकं सुशर्मदायकं विभुम् ।
स्वर्णवर्णकेशपाशशोभिताङ्गनिर्मलं
काशिकापुराधिनाथकालभैरवं भजे ॥५ ॥

रत्नपादुकाप्रभाभिरामपादयुग्मकं

नित्यमद्वितीयमिष्टदैवतं निरञ्जनम् ।

मृत्युदर्पनाशनं करालदंष्ट्रभूषणं

काशिकापुराधिनाथकालभैरवं भजे ॥६ ॥

अट्टहासभिन्नपद्मजाण्डकोशसंततिं

दृष्टिपातनष्टपाप जालमुग्रशासनम् ।

अष्टसिद्धिदायकं कपालमालिकाधरं

काशिकापुराधिनाथकालभैरवं भजे ॥७ ॥

भूतसङ्घनायकं विशालकीर्तिदायकं

काशिवासिलोकपुण्यपापशोधकं विभुम् ।

नीतिमार्गकोविदं पुरातनं जगत्पतिं

काशिकापुराधिनाथकालभैरवं भजे ॥८ ॥

कालभैरवाष्टकं पठन्ति ये मनोहरं

ज्ञानमुक्तिसाधकं विचित्रपुण्यवर्धनम् ।

शोकमोहलोभदैन्यकोपतापनाशनं

ते प्रयान्ति कालभैरवाङ्घ्रिसंनिधिं ध्रुवम् ॥९ ॥

इति श्रीशंकराचार्य विरचितं कालभैरवाष्टकम् संपूर्णम्

# वीरेश्वरस्तोत्रम्

एकं ब्रह्मैवाद्वितीयं समस्तं सत्यं सत्यं नेह नानास्ति किञ्चित् ।
एको रुद्रो न द्वितीयोवतस्थे तस्मादेकं त्वां प्रपद्ये महेशम् ॥१ ॥

एकः कर्ता त्वं हि सर्वस्य शम्भो नानारूपेष्वेकरूपोप्यरूपः ।
यद् वत् प्रत्यप्स्वर्क एकोप्यनेकः तस्मान्नायं त्वां विनेशं प्रपद्ये ॥२ ॥

रज्जौ सर्पः शुक्तिकायां च रौप्यं नीरः पूरस्तन्मृगाख्ये मरीचौ ।
यद्वद् तद्वद् विष्वगेष प्रपञ्चो यस्मिञ्ज्ञाते तं प्रपद्ये महेशम् ॥३ ॥

तोये शैत्यं दाहकत्वं च वह्नौ तापो भानौ शीतभानौ प्रसादः ।
पुष्पे गन्धो दुग्धमध्ये च सर्पिर्यत्तच्छंभो त्वं ततस्त्वां प्रपद्ये ॥४ ॥

शब्दं गृहणास्यश्रवास्त्वं हि जिघ्रेरघ्राणस्त्वं व्यंध्रिरायासि दूरात् ।
व्यक्षः पश्येस्त्वं रसज्ञोप्यजिह्वः कस्त्वां सम्यग् वेत्यतस्त्वां प्रपद्ये ॥५ ॥

नो वेदस्त्वामीश साक्षाद् विवेद नो वा विष्णुर्नो विधाताखिलस्य ।
नो योगीन्द्रा नेन्द्रमुख्याश्च देवा भक्तो वेद त्वामतस्त्वां प्रपद्ये ॥६ ॥

नो ते गोत्रं नेश जन्मापि नाख्या नो व रूपं नैव शीलं न देशः ।
इत्थंभूतोपीश्वरस्त्वं त्रिलोक्याः सर्वान् कामान् पूरयेस्तद्भजे त्वाम् ॥७ ॥

त्वतः सर्वं त्वं हि सर्वं स्मरारे त्वं गौरीशस्त्वं च नग्नोतिशान्तः ।
त्वं वै वृद्धस्त्वं युवा त्वं च बालस्तत्त्वं यत्किं नास्त्यतस्त्वां नतोस्मि ॥८ ॥

(स्कन्द पुराणोक्त वीरेश्वर स्तोत्रं सम्पूर्णम्)

# सदाशिवस्तोत्रम्

धरापोग्निमरुद्व्योममखेशेन्द्वर्कमूर्तये ।
सर्वभूतान्तरस्थाय शङ्कराय नमो नमः ॥१ ॥

श्रुत्यन्तकृतवासाय श्रुतये श्रुतिजन्मने ।
अतीन्द्रियाय महसे शाश्वताय नमो नमः ॥२ ॥

स्थूलसूक्ष्मविभागाभ्या-मनिर्देश्याय शम्भवे ।
भवाय भवसम्भूत-दुःखहन्त्रे नमोस्तु ते ॥३ ॥

तर्कमार्गातिदूराय तपसां फलदायिने ।
चतुर्वर्गवदान्याय सर्वज्ञाय नमो नमः ॥४ ॥

आदिमध्यान्तशून्याय निरस्ताशेषभीतये ।
योगिध्येयाय महते निर्गुणाय नमो नमः ॥५ ॥

विश्वात्मनेविचिन्त्याय विलसच्चन्द्रमौलये ।
कन्दर्पदर्पकालाय कालहन्त्रे नमो नमः ॥६ ॥

विषाशनाय विहरद्-वृषस्कन्धमुपेयुषे ।
सरिद्दामसमाबद्ध-कपर्दाय नमो नमः ॥७ ॥

शुद्धाय शुद्धभावाय शुद्धानामन्तरात्मने ।
पुरान्तकाय पूर्णाय पुण्यनाम्ने नमो नमः ॥८ ॥

भक्ताय निजभक्तानां भक्तिमुक्तिप्रदायिने ।
विवासते विवासाय विश्वेषां ते नमो नमः ॥९ ॥

त्रिमूर्तिमूलभूताय त्रिनेत्राय दयाब्धये ।
त्रिधाम्ने धामरूपाय जन्मघ्नाय नमो नमः ॥१० ॥

देवासुरशिरोरत्न - किरणारुणितांघ्रये ।
कान्ताय निजकान्तायै दत्तार्द्धाय नमो नमः ॥११ ॥

स्तोत्रेणानेन पूजायां प्रीणयेज्जगतां पतिम् ।
भुक्तिमुक्तिप्रदं भक्त्या सर्वज्ञं सोमशेखरम् ॥

# श्री उमामहेश्वरस्तोत्रम्

नमः शिवाभ्यां नवयौवनाभ्यां परस्पराश्लिष्टवपुर्धराभ्याम् ।
नगेन्द्रकन्यावृषकेतनाभ्यां नमो नमः शङ्करपार्वतीभ्याम् ॥१ ॥

नमः शिवाभ्यां सरसोत्सवाभ्यां नमस्कृताभीष्टवरप्रदाभ्याम्
नारायणेनार्चितपादुकाभ्यां नमो नमः शं ॥२ ॥

नमः शिवाभ्यां वृषवाहनाभ्यां विरिञ्चिविष्ण्विन्द्रसुपूजिताभ्याम् ।
विभूतिपाटीरविलेपनाभ्यां नमो नमः शं ॥३ ॥

नमः शिवाभ्यां जगदीश्वराभ्यां जगत्पतिभ्यां जयविग्रहाभ्याम् ।
जंभारिमुख्यैरभिवन्दिताभ्यां नमो नमः शं ॥४ ॥

नमः शिवाभ्यां परमौषधाभ्यां पञ्चाक्षरीपञ्जररञ्जिताभ्याम् ।
प्रपञ्चसृष्टिस्थितिसंहृताभ्यां नमो नमः शं ॥५ ॥

नमः शिवाभ्यां कलिनाशनाभ्यां कंकालकल्याणवपुर्धराभ्याम् ।
कैलासशैलस्थितदेवताभ्यां नमो नमः शं ॥६ ॥

नमः शिवाभ्यामशुभापहाभ्यां अशेषलोकैकविशेषिताभ्याम् ।
अकुण्ठिताभ्यां स्मृतिःसंभृताभ्यां नमो नमः शं ॥७ ॥

नमः शिवाभ्यां विषमेक्षणाभ्यां बिल्वच्छदामल्लिकदामभृद्भ्याम् ।
शोभावती शान्तवतीश्वराभ्यां नमो नमः शङ्करपार्वतीभ्याम् ॥८ ॥

(श्री शंकर भगवद्पाद कृतं स्तोत्रं संक्षिप्तं)

# दारिद्र्यदुःखदहनस्तोत्रम्

विश्वेश्वराय विषकंठविभूषणाय कर्णामृताय शशिशेखरधारणाय ।
कर्पूरकान्तिधवलाय जटाधराय दारिद्र्यदु:खदहनाय नम: शिवाय ॥१ ॥

गौरीप्रियाय रजनीशकलाधराय कालान्तकाय भुजगाधिपकंकणाय ।
गंगाधराय गजराजविमर्दनाय दारिद्र्यदु:खदहनाय नम: शिवाय ॥२ ॥

भक्तिप्रियाय भवरोगभयापहाय उग्राय दुर्गभवसागरतारणाय ।
ज्योतिर्मयाय गुणनामसुपूजिताय दारिद्र्यदु:खदहनाय नम: शिवाय ॥३ ॥

चर्माम्बराय शवभस्मविलेपनाय भालेक्षणाय मणिकुण्डलमण्डिताय ।
मञ्जीरपादयुगलाय जटाधराय दारिद्र्यदु:खदहनाय नम: शिवाय ॥४ ॥

पंचाननाय फणिराजविभूषणाय हेमांशुकाय भुवनत्रयमण्डिताय ।
आनन्दभूमिवरदाय नटेश्वराय दारिद्र्यदु:खदहनाय नम: शिवाय ॥५ ॥

भानुप्रियाय भवसागरतारणाय कालान्तकाय कमलासनपूजिताय ।
नेत्रत्रयाय शुभलक्षणलक्षिताय दारिद्र्यदु:खदहनाय नम: शिवाय ॥६ ॥

रामप्रियाय रघुनाथवरप्रदाय नादप्रियाय नरकार्णवतारणाय ।
पुण्येषु पुण्यभरिताय सुरार्चिताय दारिद्र्यदु:खदहनाय नम: शिवाय ॥७ ॥

मुक्तेश्वराय फलदाय गणेश्वराय गीतप्रियाय वृषभेश्वरवाहनाय ।
मातङ्गचर्मवसनाय महेश्वराय दारिद्र्यदु:खदहनाय नम: शिवाय ॥८ ॥

वसिष्ठेन कृतं स्तोत्रं सर्वरोगनिवारणम् ।
त्रिसंध्यं य: पठेन्नित्यं स हि सर्वमवाप्नुयात् ॥९ ॥

# श्रीदक्षिणामूर्तिवर्णमालास्तोत्रम्

ओमित्येतद्यस्य बुधैर्नाम गृहीतं
यद्भासेदं भाति समस्तं वियदादि ।
यस्याज्ञातः स्वस्वपदस्था विधिमुख्याः
तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥१ ॥

नम्रांगाणां भक्तिमतां यः पुरुषार्थान्-
दत्त्वा क्षिप्रं हन्ति च तत्सर्वविपत्तीः ।
पादांभोजाधस्तनितापस्मृतिमीशं
तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥२ ॥

मोहध्वस्त्यै वैणिकवैयासिकमुख्याः
संविन्मुद्रा-पुस्तक-वीणाक्षगुणान् यम् ।
हस्तांभोजैर्-विभ्रतमाराधितवन्तः
तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥३ ॥

भद्रारूढं भद्रदमाराधयितृणां
भक्तिश्रद्धापूर्वकमीशं प्रणमन्ति ।
आदित्या यं वाञ्छितसिद्ध्यै करुणाब्धिं
तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥४ ॥

गर्भान्तस्थाः प्राणिन एते भवपाश-
च्छेदे दक्षं निश्चितवन्तः शरणं यम् ।
आराध्यांघ्रि-प्रस्फुरदंभोरुहयुग्मं
तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥५ ॥

वक्त्रं धन्या: संसृतिवार्धे-रतिमात्राद्

भीता: सन्त: पूर्णशशांकद्युति यस्य ।

सेवन्ते-ध्यासीनमनन्तं वटमूलं

तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥६ ॥

तेज: स्तोमैरंगदसंघट्टितभास्वन् -

माणिक्योत्थैर् - भासितविश्वो रुचिरैर्य: ।

तेजोमूर्तिं खानिलतेज: प्रमुखाब्धिं

तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥७ ॥

दध्याज्यादि-द्रव्यक-कर्माण्यखिलानि

त्यक्त्वा कांक्षां कर्मफलेष्वत्र करोति ।

यज्जिज्ञासा-रूपफलार्थी क्षितिदेव: ।

तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥८ ॥

क्षिप्रं लोके यं भजमान: पृथुपुण्य:

प्रध्वस्ताधि: प्रोज्झित्-संसृत्यखिलार्ति: ।

प्रत्यग्भूतं ब्रह्म परं सन् रमते य:

तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥९ ॥

णानेत्येवं यन्मनुमध्य-स्थितवर्णान्

भक्ता: काले वर्णगृहीत्यं प्रजपन्त: ।

मोदन्ते संप्राप्त-समस्त-श्रुतितन्त्रा:

तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥१० ॥

मूर्तिश्छाया-निर्जित-मन्दाकिनि-कुन्द-
प्रालेयांभोराशि-सुधाभूति-सुरेभा ।
यस्याभ्राभा-हासविधौ-दक्षशिरोधिः
तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥११ ॥

तप्तस्वर्णाच्छायजटाजूटकटाह -
प्रोद्यद्वीची-वल्लिविराजत्-सुरसिन्धुम् ।
नित्यं सूक्ष्मं नित्यनिरस्ताखिलदोषम्
तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥१२ ॥

येन ज्ञातेनैव समस्तं विदितं स्याद्
यस्मादन्यत्-वस्तु जगत्यां शशशृंगम् ।
यं प्राप्तानां नास्ति परं प्राप्यमनादिम्
तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥१३ ॥

मत्तो मारो यस्य ललाटाक्षिभवाग्नि-
स्फूर्जत् -कीलप्रोषितभस्मीकृतदेहः ।
तद्भस्मासीद्-यस्य सुजातः पटवासः ।
तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥१४ ॥

ह्यं भोराशौ संसृतिरूपे लुठतां तत्
पारं गन्तुं यत्पदभक्तिर्-दृढनौका ।
सर्वाराध्यं सर्वगमानन्दपयोधिं
तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥१५ ॥

मेधावी स्यादिन्दुवतंसं धृतवीणां
कर्पूराभं पुस्तकहस्तं कमलाक्षम् ।
चित्ते ध्यायन्-यस्य वपुर्-द्राङ्-निमिषार्धं
तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥१६ ॥

धाम्नां धाम प्रौढरुचीनां परमं यत्
सूर्यादीनां यस्य न हेतुर्जगदादेः ।
एतावान्यो यस्य न सर्वेश्वरमीड्यं
तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥१७ ॥

प्रत्याहार-प्राणनिरोधादि-समथैर
भक्तैर्दान्तैः संयतचित्तैर्-यतमानैः ।
स्वात्मत्वेन ज्ञायत एव त्वरया यः
तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥१८ ॥

ज्ञांशीभूतान् प्राणिन एतान् फलदाता
चित्तान्तस्थः प्रेरयति स्वे सकलेपि
कृत्ये देवः प्राक्तन-कर्मानुसरः सं-
तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥१९ ॥

प्रज्ञामात्रं प्रापित-संविन्-निजभक्तं
प्राणाक्षादेः प्रेरयितारं प्रणवार्थम् ।
प्राहुः प्राज्ञा यं विदितानुश्रवतत्त्वा
तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥२० ॥

यस्याज्ञानादेव नृणां संसृतिबोधो
यस्य ज्ञानादेव विमोक्षो भवतीति ।
स्पष्टं ब्रूते वेदशिरो देशिकमाद्यं
तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥२१ ॥

छन्नेविद्या-रूपपटेनैव च विश्वं
यत्राध्यस्तं जीवपरेशत्वमपीदम् ।
भानोर्भानुष्-वम्बुवदस्ताखिलभेदं
तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥२२ ॥

स्वापस्वप्नौ जाग्रदवस्थापि न यत्र
प्राणश्चेतः सर्वगतो यः सकलात्मा ।
कूटस्थो यः केवलसच्चित् सुखरूपम्
तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥२३ ॥

हा हेत्येवं विस्मयमीयुर्मुनिमुख्या
ज्ञाते यस्मिन् स्वात्मतयानात्मविमोहः ।
प्रत्यग्भूते ब्रह्मणि यातः कथमित्थं
तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥२४ ॥

यैषा रम्यैर्-मत्तमयूराभिध वृत्तैः
आदौ क्लृप्ता यन्मनुवर्णैर्मुनिभंगी ।
तामेवैतां दक्षिणवक्त्रः कृपयासौ-
वूरीकुर्याद् देशिकसाम्राट् परमात्मा ॥२५ ॥

इति श्रीशंकराचार्य विरचितं श्रीदक्षिणामूर्ति वर्णमालास्तोत्रम् संपूर्णम्

# श्रीमेधादक्षिणामूर्ति-मन्त्रवर्णपदस्तुतिः

ओमित्येकाक्षरं ब्रह्म व्याहरन्ति त्रयशिशखाः ।
तस्मै तारात्मने मेधादक्षिणामूर्तये नमः ॥१ ॥

नत्वायं मुनयस्सर्वे परं यान्ति दुरासदम् ।
नकाररूपिणे मेधादक्षिणामूर्तये नमः ॥२ ॥

मोहजालविनिर्मुक्तो ब्रह्मविद् याति यत्पदम् ।
मोकाररूपिणे मेधादक्षिणामूर्तये नमः ॥३ ॥

भवमाश्रित्य यं विद्वान् भवे नह्यभवत् पुनः ।
भकाररूपिणे मेधादक्षिणामूर्तये नमः ॥४ ॥

गगनाकारवद्भान्तमनुभात्यखिलं जगत् ।
गकाररूपिणे मेधादक्षिणामूर्तये नमः ॥५ ॥

वटमूलनिवासो यो गुरुणां गुरुरव्ययः ।
वकाररूपिणे मेधादक्षिणामूर्तये नमः ॥६ ॥

तेजोभिर्यस्य सूर्योऽसौ कालकुप्तिकरो भवेत् ।
तेकाररूपिणे मेधादक्षिणामूर्तये नमः ॥७ ॥

दक्षत्रिपुर कामारिः यः कालविषभंजकः ।
दकाररूपिणे मेधादक्षिणामूर्तये नमः ॥८ ॥

क्षिप्रं भवति वाक्सिद्धिः यन्नामस्मरणान्नृणाम् ।
क्षिकाररूपिणे मेधादक्षिणामूर्तये नमः ॥९ ॥

णाकारवाच्यो यस्सुप्तं संदीपयति मे मनः ।
णाकाररूपिणे मेधादक्षिणामूर्तये नमः ॥१० ॥

मूर्तयोह्यष्टधा यस्य जगज्जन्मादिकारणम् ।
मूकाररूपिणे मेधादक्षिणामूर्तये नमः ॥११ ॥

तत्त्वमसीतिवाक्येन गुरूणा यत्प्रबोधितः ।
तकाररूपिणे मेधादक्षिणामूर्तये नमः ॥१२ ॥

येयं विदित्वा ब्रह्माद्या ऋषयो यान्ति निर्वृतिम् ।
येकाररूपिणे मेधादक्षिणामूर्तये नमः ॥१३॥

महामौनी करे मालां मुद्रां संविन्मयीं दधन् ।
मकाररूपिणे मेधादक्षिणामूर्तये नमः ॥१४॥

ह्यम्बिकामुखपद्मार्को हेयोपादेयवर्जितः ।
ह्यकाररूपिणे मेधादक्षिणामूर्तये नमः ॥१५॥

मेधाप्रदानदक्षाय मेरुकोदण्डपाणये ।
मेकाररूपिणे मेधादक्षिणामूर्तये नमः ॥१६॥

धामत्रयात्मनेत्राढ्य धूर्जटे धवल प्रभ ।
धाकाररूपिणे मेधादक्षिणामूर्तये नमः ॥१७॥

प्रकृतेर्यत्परं ध्यात्वा तादात्म्यं याति वै मुनिः ।
प्रकाररूपिणे मेधादक्षिणामूर्तये नमः ॥१८॥

ज्ञानिनोयमुपास्यन्ति तत्त्वातीतं चिदात्मकम् ।
ज्ञाकाररूपिणे मेधादक्षिणामूर्तये नमः ॥१९॥

प्रज्ञा सञ्जायते यस्य ध्याननामार्चनादिभिः ।
प्रकाररूपिणे मेधादक्षिणामूर्तये नमः ॥२०॥

यस्य स्मरणमात्रेण नरोमुच्येत बन्धनात् ।
यकाररूपिणे मेधादक्षिणामूर्तये नमः ॥२१॥

छन्ना यस्या छविर्मेघे सूर्यवन्मायया विभोः ।
छकाररूपिणे मेधादक्षिणामूर्तये नमः ॥२२॥

स्वान्तेविदां जडानां यो दूरे तिष्ठति चिन्मयः ।
स्वाकाररूपिणे मेधादक्षिणामूर्तये नमः ॥२३॥

हार्दाकाशविलासाय हाटकाभशरीरिणे ।
हाकाररूपिणे मेधादक्षिणामूर्तये नमः ॥२४॥

# श्रीमेधादक्षिणमूर्ति-मानसपूजास्तोत्रम्

मुद्राक्षमालामृतपात्रविद्या-व्याघ्राजिनार्धेन्दुफणीन्द्रयुक्तम् ।
ध्यायामि योगीन्द्र हृत् पद्म भृङ्गं देवं सुमेधाप्रददक्षिणास्यम् ॥१ ॥

सुवर्णरत्नामल-वज्रनीलमाणिक्यमुक्तामणियुक्तपीठे ।
आवाहये देशिकचूडमाद्यं, विज्ञानमुद्रांचितपाणिपद्मम् ॥२ ॥

श्रीजाह्नवीनिर्मलतोयमीश पाद्यार्घ्यदानाय समर्पयिष्ये ।
देवेश तेनाचमनं कुरुष्व श्री दक्षिणामूर्ति गुरुस्वरूप ॥३ ॥

स्नानं कुरुष्वामलगांगतोये सुवासितेस्मिन् शिव दक्षिणास्य ।
सुवर्णतन्तूद्भववस्त्रयुग्मं यज्ञोपवीतं परिधत्स्व देव ॥४ ॥

कस्तूरिकाचन्दनकुंकुमादिविमिश्रगंधं परिकल्पयामि ।
मन्दारपंकेरुहकुन्दजाजी-सुगन्ध पुष्पाणि गृहाण देव ॥५ ॥

दशांगधूपं परिकल्पयामि वर्तित्रयेणान्वितमाज्ययुक्तम् ।
ते दर्शयामीश सुवर्णदीपं श्रीदक्षिणामूर्तिगुरो प्रसीद ॥६ ॥

शाल्योदनं निर्मलशूपशाक-भक्ष्याज्ययुक्तं च दधिप्रसिक्तम् ।
कपित्थसद्राक्ष फलानिचैव सापोशनं भक्षय दक्षिणास्य ॥७ ॥

नीराजनं निर्मलपात्रसंस्थं कर्पूरसंदीपितमच्छरूपम् ।
करोमि गौरीश तवोपरीदं व्योमाकृते शंकर दक्षिणास्य ॥८ ॥

पुष्पांजलिं पादतले विकीर्णाम् छत्रादिराजोपचारान् गृहाण ।
ममापराधान् सकलान् क्षमस्व दयानिधे मौनगुरो प्रसीद ॥९ ॥

नमोनमः पापविनाशनाय नमोनमः कञ्जभवार्चिताय ।
नमोनमः कृष्णहृदिस्थिताय श्रीदक्षिणामूर्तिमहेश्वराय ॥१० ॥

# पंचाक्षरी नक्षत्रमाला

कालभीतविप्रबालपाल ते नमः शिवाय
शूलभिन्नदुष्टदक्षफाल ते नमः शिवाय ।
मूलकारणाय कालकाल ते नमः शिवाय
पालयाधुना दयालवाल ते नमः शिवाय ॥१

इष्टवस्तुमुख्यदानहेतवे नमः शिवाय
दुष्टदैत्यवंशधूमकेतवे नमः शिवाय ।
सृष्टिरक्षणाय धर्मसेतवे नमः शिवाय
अष्टमूर्तये वृषेन्द्रकेतवे नमः शिवाय ॥२

व्योमकेश दिव्यभव्यरूप ते नमः शिवाय
हेममेदिनीधरेन्द्रचाप ते नमः शिवाय ।
नाममात्रदग्धसर्वपाप ते नमः शिवाय
कामनैकतानहृद्दुराप ते नमः शिवाय ॥ ३

जन्ममृत्युघोरदुःखहारिणे नमः शिवाय
चिन्मयैकरूपदेहधारिणे नमः शिवाय ।
मन्मनोरथावपूर्तिकारिणे नमः शिवाय
सन्मनोगताय कामवैरिणे नमः शिवाय ॥४

यक्षराजबन्धवे दयालवे नमः शिवाय
दक्षपाणिशोभिकाञ्चनालवे नमः शिवाय ।
पक्षिराजवाहहृच्छयालवे नमः शिवाय
अक्षिफालवेदपूततालवे नमः शिवाय ॥५

दक्षहस्तनिष्ठजातवेदसे नमः शिवाय
अक्षरात्मने नमद्बिडौजसे नमः शिवाय ।
दीक्षितप्रकाशितात्मतेजसे नमः शिवाय
उक्षराजवाह ते सतां गते नमः शिवाय ॥६

सर्वजीवरक्षणैकशीलिने नमः शिवाय
पार्वतीप्रियाय भक्तपालिने नमः शिवाय ।
दुर्विदग्धदैत्यसैन्यदारिणे नमः शिवाय
शर्वरीशधारिणे कपालिने नमः शिवाय ॥७

मंगलप्रदाय गोतुरंग ते नमः शिवाय
गंगया तरंगितोत्तमांग ते नमः शिवाय ।
सङ्गरप्रवृत्तवैरिभङ्ग ते नमः शिवाय
अङ्गजारये करे कुरङ्ग ते नमः शिवाय ॥८

सेवकाय मे मृड प्रसीद ते नमः शिवाय
भावलभ्य तावकप्रसाद ते नमः शिवाय ।
पावकाक्ष देवपूज्यपाद ते नमः शिवाय
तावकांघ्रिभक्तदत्तमोद ते नमः शिवाय ॥९

भुक्तिमुक्तिदिव्यभोगदायिने नमः शिवाय
शक्तिकल्पितप्रपञ्चभागिने नमः शिवाय ।
भक्तसंक्रटापहारयोगिने नमः शिवाय
युक्तसन्मनः सरोजयोगिने नमः शिवाय ॥१०

शूलिने नमो नमः कपालिने नमः शिवाय
पालिने विरिञ्चितुण्डमालिने नमः शिवाय ।
लीलिने विशेषरुण्डमालिने नमः शिवाय
शीलिने नमः प्रपुण्यशालिने नमः शिवाय ॥११

# अष्टमूर्ति रक्षास्तोत्रम्

हे शर्व भू रूप पर्वतसुतेश
हे धर्म वृषावाह कांचीपुरीश
दववास सौगन्ध्य भुजगेन्द्रभूष
पृथ्वीश मां पाहि प्रथमाष्टमूर्ते ॥१ ॥

हे दोषमल जाड्यहर शैलजाप
हे जम्बु केशेश भव नीररूप
गंगार्द्र करुणार्द्र नित्याभिषिक्त
जललिंग मां पाहि द्वितीयाष्टमूर्ते ॥२ ॥

हे रुद्र कालाग्नि रूपाघ नाशिन्
हे भस्मदिग्धांग मदनान्तकारिन्
अरुणाद्रिमूर्तेर्बुर्दशैल वासिन्
अनलेश मां पाहि तृतीयाष्टमूर्ते ॥३ ॥

हे मातरिश्वन् महाव्योमचारिन्
हे कालहस्तीश शक्ति प्रदायिन्
उग्र प्रमथनाथ योगीन्द्र सेव्य
पवनेश मां पाहि तुरीयाष्टमूर्ते ॥४ ॥

हे निष्कलाकाश- संकाश देह
हे चित्सभानाथ विश्वंभरेश
शम्भो विभो भीमदहर प्रविष्ट
व्योमेश मां पाहि कृपयाष्टमूर्ते ॥५ ॥

हे भर्ग तरणेखिललोकसूत्र
हे द्वादशात्मन् श्रुतिमन्त्र गात्र
ईशान ज्योतिर्मयादित्यनेत्र
रविरूप मां पाहि महसाष्टमूर्ते ॥६ ॥

हे सोम सोमार्द्ध षोडषकलात्मन्
हे तारकान्तस्थ शशिखण्डमौलिन्
स्वामिन् महादेव मानसविहारिन्
शशिरूप मां पाहि सुधयाष्टमूर्ते ॥७ ॥

हे विश्वयज्ञेश यजमान वेष
हे सर्वभूतात्मभूतप्रकाश
प्रथित: पशूनां पतिरेक ईड्य
आत्मेश मां पाहि परमाष्ट मूर्ते ॥८ ॥

परमात्मन: ख: प्रथम: प्रसूत:
व्योमाच्च वायुर्जनितस्ततोग्नि:
अनलाज्जलोभूत् अद्भ्यस्तु धरणि:
सूर्येन्दुकलितान् सततं नमामि ॥
दिव्याष्टमूर्तीन् सततं नमामि
संविन्मयान् तान् सततं नमामि ॥९ ॥

# नटेशस्तुतिः

श्रीकैलासे प्रदोषे नटतिपुरहरे देवदैत्यादि वंद्ये

पश्यन्त्यां शैलपुत्र्यां नटनमतिमुदा स्वर्वधूसंवृतायाम् ।

ब्रह्मातालंचवेणुं कलयति मघवा मद्दलं चक्रपाणि:

घित्तांधित्तांधिमित्तां धिमिधिमिधिमितां धिंधिमी धिंधिमीति ॥१ ॥

नन्दी मद्दलवाद्यमृद्धितनुते तांतां तथिंतामिति

ब्रह्मातालरवं तकृत् तकृततत् तत्तत् तकृत् तामिति ।

गानंतुम्बुरुनारदौ तननना तानानना तानना

शंभौ नृत्यति स्र्वणसंसदि सदा झझं झणंझामिति ॥२ ॥

शार्दूलांधिपतंजलिप्रभृतिभि: साकं मुनीन्द्रैर्गणै:

शैलादिप्रमथै: हरीन्द्रविबुधैश्चाहं सभायांचते ।

ब्रह्मानन्द निदानतांडवसुधास्वादी भवेयंविभो

नान्यत्वांछितमस्ति मे नटपते भूयो नमस्ते नम: ॥३

( भृंगिरिटिकृता संक्षिप्ता नटेश स्तुतिः)

# पतंजलिकृत नटराजस्तोत्रम्

सदाञ्चितमुदञ्चितनिकुञ्चितपदं झलझलञ्चलितमञ्जुकटकम्
पतञ्जलिदृगञ्जनमनञ्जनमचञ्चलपदं जननभञ्जनकरम् ।
कदम्बरुचिमम्बरवसं परमम्बुदकदम्बकविडम्बकगलम्
चिदम्बुधिमणिं बुधहृदम्बुजरविं परचिदम्बरनटं हृदि भजे ॥१ ॥

हरं त्रिपुरभञ्जनमनन्त-कृतकंकणमखण्डदयमन्तरहितं
विरिञ्चिसुरसंहतिविचिन्तितपदं तरुणचन्द्रभुजगेन्द्रमुकुटम् ।
परं पदविखण्डितयमं भसितमण्डिततनुं मदनवञ्चनपरं
चिरन्तनममुं प्रणवसञ्चितनिधिं परचिदम्बरनटं हृदि भजे ॥२ ॥

अन्तमखिलं जगदभङ्गगुणतुङ्गममलं धृतविधुं सुरसरित्-
तरङ्गनिकुरम्बधृतिलम्पटजटं शमनदम्भसुहरं भवहरम् ।
शिवं दशदिगन्तरविजृम्भितकरं करलसन्मृगशिशुं पशुपतिं
हरं शशिधनञ्जयपतङ्गनयनं परचिदम्बरनटं हृदि भजे ॥३ ॥

अनन्तनवरत्नविलसत्कटककिङ्किणिझलंझलझलंझलरवं
मुकुन्दविधिहस्तगतमद्धललयध्वनिधिमिद्धिमितनर्तनपदम् ।
शकुन्तरथबर्हिरथ नन्दिमुख शृंगिरिटि भृंगिगणसङ्घनिकटम्
सनन्दसनकप्रमुखवन्दितपदं परचिदम्बरनटं हृदि भजे ॥४ ॥

अनन्तमहसं त्रिदशवन्द्यचरणं मुनिहृदन्तरवसन्तममलम्
कबन्धवियदिन्द्ववनिगन्धवहवह्निमखबन्धुरविमञ्जुवपुषम् ।
अनन्तविभवं त्रिजगदन्तरमणिं त्रिनयनं त्रिपुरखण्डनपरम्
सनन्दमुनिवन्दितपदं सकरुणं परचिदम्बरनटं हृदि भजे ॥५ ॥

अचिन्त्यमलिवृन्दरुचिबन्धुरगलं कुरितकुन्दनिकुरम्बधवलं
मुकुन्दसुरवृन्दबलहन्तृ कृतवन्दनलसन्तमहिकुण्डलधरम् ।
अकम्पमनुकम्पितरतिं सुजनमङ्गलनिधि गजहरं पशुपतिं
धनञ्जयनुतं प्रणतरञ्जनपरं परचिदम्बरनटं हृदि भजे ॥६ ॥

परं सुरवरं पुरहरं पशुपतिं जनितदन्तिमुखषण्मुखममुं
मृडं कनकपिङ्गलजटं सनकपङ्कजरविं सुमनसं हिमरुचिम् ।
असङ्गमनसं जलधिजन्मगरलं कवलयन्तमतुलं गुणानिधिं
सनन्दवरदं शमितमिन्दुवदनं परचिदम्बरनटं हृदि भजे ॥७ ॥

अजं क्षितिरथं भुजगपुङ्गवगुणं कनकशृङ्गिधनुषं करलसत्
कुरङ्गपृथुटङ्कपरशुं रुचिरकुंकुमरुचिं डमरुकं च दधतम् ।
मुकुन्दविशिखं नमदवन्ध्यफलदं निगमवृन्दतुरगं निरुपमं
सचण्डिकममु झटितिसंहृतपुरं परचिदम्बरनटं हृदि भजे ॥८ ॥

अनङ्गपरिपन्थिनभजं क्षितिधुरन्धरमलं करुणयन्तमखिलं
ज्वलन्तमनलं दधतमन्तकरिपुं सततमिन्द्रमुखवन्दितपदम् ।
उदञ्चदरविन्दकुलबन्धुशतबिम्बरुचिसंहतिसुगन्धिवपुषं
पतञ्जलिनुतं प्रणवपञ्जरशुकं परचिदम्बरनटं हृदि भजे ॥९ ॥

इति स्तवममुं भुजगपुङ्गवकृतं प्रतिदिनं पठति यः कृतमुखः
सदः प्रभुपदद्वितयदर्शनपदं सुललितं चरणशृङ्गरहितम् ।
सरः प्रभवसम्भवहरित्पतिहरिप्रमुखदिव्यनुतशङ्करपदं
सगच्छति परं न तु जनुर्जलनिधिं परमदुः खजनकं दुरितदम् ॥१० ॥

# चिदम्बरेश स्तुतिः

कृपासमुद्रं सुमुखं त्रिनेत्रं
जटाधरं पार्वतिवामभागम् ।
सदा शिवं रुद्रमनन्तरूपं
चिदम्बरेशं हृदि भावयामि ॥१ ॥

कल्याणमूर्तिं कनकाद्रिचापं
कान्तासमाक्रान्तनिजार्धदेहं ।
कालान्तकं कामरिपुं पुरारिं
चिदम्बरेशं हृदि भावयामि ॥२ ॥

वेदान्तवेद्यं भुवनैकवन्द्यं
मायाविहीनं करुणार्द्रचित्तम् ।
ज्ञानप्रदं ज्ञानिनिषेवितांघ्रिं
चिदम्बरेशं हृदि भावयामि ॥३ ॥

दिगम्बरं शासितदक्षयज्ञं
त्रयीमयं पार्थवरप्रदं तम् ।
सदादयं वह्निरवीन्दुनेत्रं
चिदम्बरेशं हृदि भावयामि ॥४ ॥

कर्पूरगात्रं कमनीयनेत्रं
कंसारिवन्द्यं कनकाभिरामम् ।
कृशानुढक्काधरमप्रमेयं
चिदम्बरेशं हृदि भावयामि ॥५ ॥

अनन्तमद्वैतमजस्रभासुरं
ह्यतर्क्यमानन्दरसं परात्परम् ।
यज्ञाधिदैवं यमिनां वरेण्यं
चिदम्बरेशं हृदि भावयामि ॥६ ॥

वैयाघ्रपादेन महर्षिणा कृतां
चिदम्बरेशस्तुतिमादरेण ।
पठन्ति ये नित्यमुमासखस्य
प्रसादतो यान्ति निरामयं पदम् ॥७ ॥

इति व्याघ्रपाद विरचिता चिदम्बरेश स्तुतिः ॥

# शिव वन्दन स्तोत्रम्

वन्दे शम्भुमुपापतिं सुरगुरुं वन्दे जगत्कारणं
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ।
वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियम्
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शंकरम् ॥१ ॥

वन्दे सर्वजगद्विहारमतुलं वन्दे करित्वग्धरं
वन्दे देवशिखामणिं शशिनिभं वन्दे हरेर्वल्लभम् ।
वन्दे पर्वतकन्यकार्धवपुषं वन्दे परं चिन्मयं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शंकरम् ॥२ ॥

वन्दे व्योमसभापतिं नटपतिं वन्देऽर्कदन्तापहं
वन्दे निर्मलमादिभूतमनिशं वन्दे मखध्वंसिनम् ।
वन्दे नित्यमगेन्द्रजाप्रियकरं वन्देऽतिशान्ताकृतिं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शंकरम् ॥३ ॥

वन्दे भूरथमम्बुजाक्षविशिखं वन्दे त्रयीवाजिनं
वन्दे शैलशरासनं फणिगुणं वन्देऽब्धितूणीरकम् ।
वन्दे पद्मजसारथिं पुरहरं वन्दे महाभैरवं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शंकरम् ॥४ ॥

वन्दे पञ्चमुखाम्बुजं त्रिनयनं वन्दे ललाटेक्षणं
वन्दे व्योमकचं जटासुमकुटं वन्देऽब्जगंगाधरम् ।
वन्दे मारहरं त्रिपुण्ड्रनिटिलं वन्देऽष्टमूर्त्यात्मकम्
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शंकरम् ॥५ ॥

वन्दे राजत-पर्वताग्रनिलयं वन्दे सुराधीश्वरं
वन्दे निर्गुणमप्रमेयममलं वन्दे यमद्वेषिणम् ।
वन्दे कुण्डलिराजकुण्डल धरं वन्दे सहस्त्राननं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शंकरम् ॥६ ॥

वन्देऽनन्तर विप्रकाशमगुणं वन्देऽन्धकस्यान्तकं
वन्दे पद्मजविष्णुगर्वकुलिशं वन्दे दयाम्भोनिधिम् ।
वन्दे चित्सभमीश्वरं सुरनुतं वन्दे त्रिमूर्त्यात्मकं
वन्दे भक्तजनाश्रयंच वरदं वन्दे शिवं शंकरम् ॥७ ॥

वन्देऽपस्मृतिशिक्षकं विषहरं वन्दे मृडं धूर्जटिं
वन्दे विषवरै स्सुपूजितपदं वन्दे भवोत्तारकम् ।
वन्दे धर्ममुखार्थदं त्रृतिनुतं वन्दे गुरुणां गुरुं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शंकरम् ॥८ ॥

शार्दूलांघ्रिमहर्षिणा विरचितं सङ्कीर्तयेद्वन्दन-
स्तोत्रं तद्गतनामभिर्यजति यश्शम्भुं सभायाः पतिम् ।
सन्ध्यासु प्रतिवासरं सुनियतो धर्मादिसत्संपदो
लब्ध्वा चेन्दुकलाधरस्य सचिवो भूत्वा सदा क्रीडति ॥९ ॥

# शिवापराधक्षमापण स्तोत्रम्

आदौ कर्मप्रसंगात्कलयति कलुषं मातृकक्षौ स्थितं मां
विण्मूत्रामेध्यमध्ये क्वथयति नितरां जाठरो जातवेदाः ।
यद्वद्वै तत्र दुःखं व्यथयति नितरां शक्यते केन वक्तुं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो ॥१ ॥

बाल्ये दुःखातिरेकान्मललुलितवपुः स्तन्यपाने पिपासुः
नो शक्तश्चेन्द्रियेभ्यो भव मलजनिता जन्तवो मां दुदन्ति ।
नानारोगातिदुःखाद् रुदनपरवशः शंकरं न स्मरामि
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो ॥२ ॥

प्रौढ़ोऽहं यौवनस्थो विषयविषधरैः पञ्चभिर्मर्मसंधौ
दष्टो नष्टो विवेकः सुतधनयुवतिस्वादूसौख्ये निषण्णः ।
शैवीचिन्ताविहीनं मम हृदयमहो मानगर्वाधिरूढं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्री महादेव शंभो ॥३ ॥

वार्धक्ये चेन्द्रियाणां विकलगतिमतिश्चाधिदैवादितापैः
प्राप्तै रोगैर्वियोगैर् व्यसनकृशतनोर् ज्ञप्तिहीनं च दीनम् ।
मिथ्यामोहाभिलाषैर्भ्रमति मम मनो धूर्जटेर्ध्यानशून्यं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्री महादेव शंभो ॥४ ॥

स्नात्वा प्रत्यूषकाले स्नपनविधिविधौ नाहृतं गांगतोयं

पूजार्थऽवा कदाचिद् बहुतरगहनेऽखण्डबिल्वीदलं वा

नानीता पद्ममाला सरसि विकसिता गन्धपुष्पैस्त्वदर्थं

क्षन्तव्यो मेऽपराध: शिव शिव शिव भो: श्री महादेव शंभो ॥५ ॥

दुग्धैर्मध्वाज्ययुक्तैर् दधिगुडसहितै: स्नापितं नैव लिंगं

नो लिप्तं चन्दनाद्यै: कनकविरचितै: पूजितं न प्रसूनै: ।

धूपै: कर्पूरदीपैर्विविधरसयुतैर्नैव भक्ष्योपहारै:

क्षन्तव्यो मेऽपराध: शिव शिव शिव भो: श्रीमहादेव शंभो ॥६ ॥

नोशक्यं स्मार्तकर्म प्रतिपदगहने प्रत्यवायाकुलाढ्ये

श्रौते वार्ता कथं मे द्विजकुलविहिते ब्रह्ममार्गानुसारे ।

तत्त्वे ज्ञातोऽविचारै: श्रवणमननयो: किं निदिध्यासितव्यं

क्षन्तव्यो मेऽपराध: शिव शिव शिव भो: श्रीमहादेव शंभो ॥७ ॥

ध्यात्वा चित्ते शिवाख्यं प्रचुरतरधनं नैव दत्तं द्विजेभ्यो

हव्यं ते लक्षसंख्यैर्-हुतवहवदने नार्पितं बीजमन्त्रै: ।

नो तप्तं गांगतीरे व्रतजपनियमै: रुद्रजाप्यैर्न वेदै:

क्षन्तव्यो मेऽपराध: शिव शिव शिव भो: श्रीमहादेव शंभो ॥८ ॥

स्थित्वा स्थाने सरोजे प्रणवमयमरुत्कुम्भिते सूक्ष्ममार्गे

शान्ते स्वान्ते प्रलीने प्रकटितविभवे ज्योतिरूपे पराख्ये ।

लिंगाग्रे ब्रह्मवाक्ये सकलतनुगतं शंकरं न स्मरामि

क्षन्तव्यो मेऽपराध: शिव शिव शिव भो: श्री महादेव शंभो ॥९ ॥

नग्नो नि:संगशुद्धस्त्रिगुणविरहितो ध्वस्तमोहान्धकारो

नासाग्रन्यस्तदृष्टिर्विदित भवगुणो नैव दृष्ट: कदाचित्

उन्मन्यावस्थया त्वां विगतगतिमति: शंकरं न स्मरामि

क्षन्तव्यो मेऽपराध: शिव शिव शिव भो: श्री महादेव शंभो ॥१० ॥

शुद्धं वेदान्तवेद्यं हृदयसरसिजे दीप्तमुद्यत्प्रकाशं

सत्यं शान्तस्वरूपं सकलमुनिमन: पद्मखण्डैकवेद्यम् ।

जाग्रत्स्वप्ने सुषुप्तौ त्रिगुणविरहितं शंकरं न स्मरामि

क्षन्तव्यो मेऽपराध: शिव शिव शिव भो: श्री महादेव शंभो ॥११ ॥

इति श्री शंकराचार्य विरचितं स्तोत्रं सपूर्णम्


शक्तिस्तोत्राणि

# श्रीकामाक्षी सुप्रभातम्

उत्तिष्ठोत्तिष्ठ वरदे उत्तिष्ठ जगदीश्वरि ।
उत्तिष्ठ जगदधारे त्रैलोक्यां मंगलं कुरु ॥१ ॥

श्रृणोषि कच्चिद् ध्वनिरुत्थितोऽयं, मृदङ्गभेरीपटहानकानाम् ।
वेद ध्वनिशिक्षितभूसुराणां, श्रृणोषि भद्रे कुरु सुप्रभातम् ॥२ ॥

श्रृणोषि भद्रे ननु शंखघोषं, वेतालिकानां मधुरं च गानम् ।
श्रृणोषि मात: पिककुक्कुटानां, ध्वनिं - प्रभाते कुरु सुप्रभातम् ॥३ ॥

पश्याम्ब केचिद् धृतपूर्णकुम्भा:, केचिद् दयाद्रेधृतपुष्पमाला: ।
काश्चित् शुभांग्यो ननु वाद्यहस्ता:, तिष्ठन्ति तेषां कुरु सुप्रभातम् ॥४ ॥

अन्तश्चरन्त्यास्तव भूषणानां, झल्झल्ध्वनिं नूपुर - कंकणानाम् ।
श्रुत्वा प्रभाते तव दर्शनार्थी, द्वारि स्थितोऽहं कुरु सुप्रभातम् ॥५ ॥

पश्याम्ब केचित् फलपुष्प हस्ता:, केचित् पुराणानि पठन्ति मात: ।
पठन्ति वेदान् बहवस्तवाग्रे, तेषां जनानां कुरु सुप्रभातम् ॥६ ॥

माता शिशूनां परिरक्षाणर्थं, न चैव निद्रावशमेति लोके ।
माता त्रयाणां जगतां गतिस्त्वं , सदा विनिद्रा कुरू सुप्रभातम् ॥७ ॥

दिगम्बरो ब्रह्मकपालपाणि:, विकीर्णकेश: फणिवेष्टिताङ्ग: ।
तथाऽपि मातस्तव देविसङ्गात् महेश्वरोऽभूत् कुरु सुप्रभातम् ॥८ ॥

त्वं विश्वनाथस्य विशाल नेत्रा, हालास्यनाथस्य नु मीन नेत्रा ।
एकाम्रनाथस्य नु कामनेत्रा, कामेशजाये कुरु सुप्रभातम् ॥९ ॥

पश्यन्तु केचिद्वदनं त्वदीयं, स्तुवन्तु कल्याणगुणांस्तवान्ये ।
नमन्तु पादाब्जयुगं त्वदीयं, द्वारि स्थितानां कुरु सुप्रभातम् ॥१० ॥

केचित् सुमेरोशिखरेऽतितुङ्गे:, केचिन्मणिद्वीपवरे विशाले ।
पश्यन्तु केचित्त्वमृताब्धिमध्ये, पश्याम्यहं त्वामिह सुप्रभातम् ॥११ ॥

कामप्रदा कल्पतरुर्विभासि, नान्या गतिर्मे ननु चातकोऽहम् ।
वर्षस्यमोघाः कनकाम्बुधाराः काश्चितु धाराः मयि कल्पयाशु ॥१२॥

त्रिलोचनप्रियां वन्दे, वन्दे त्रिपुरसुन्दरीम् ।
त्रिलोकनायिकां वन्दे सुप्रभातं ममाम्बिके ॥१३॥

## ललितापञ्चकम्

प्रातः स्मरामि ललितावदनारविन्दं,
बिम्बाधरं पृथुलमौक्तिकशोभिनासम् ।
आकर्णदीर्घनयनं मणिकुण्डलाढ्यं,
मन्दस्मितं मृगमदोज्ज्वलफालदेशम् ॥१॥

प्रातर्भजामि ललिताभुजकल्पवल्लीं,
रक्ताङ्गुलीयलसदङ्गुलिपल्लवाढ्यम् ।
माणिक्य-हेमवलयाङ्गदशोभमानां,
पुण्ड्रेक्षुचाप कुसुमेषु सृणीर्दधानम् ॥२॥

प्रातर्नमामि ललिता चरणारविन्दं,
भक्तेष्टदाननिरतं भवसिन्धुपोतम् ।
पद्मासनादिसुरनायकपूजनीयं,
पद्मांकुशध्वजसुदर्शनलांछनाढ्यम् ॥३॥

प्रातःस्तुवे परशिवां ललितां भवानीं,
त्रय्यन्तवेद्यविभवां करुणानवद्याम् ।
विश्वस्य सृष्टिविलयस्थिति हेतुभूतां,
विश्वेश्वरीं निगम-वाङ्मनसातिदूराम् ॥४॥

**प्रातर्वदामि ललिते तव पुण्यनाम,**
**कामेश्वरीति कमलेति महेश्वरीति ।**
**श्रीशाम्भवीति जगतां जननी परेति,**
**वाग्देवतेति वचसा त्रिपुरेश्वरीति ॥५॥**

यः श्लोकपञ्चकमिदं ललिताम्बिकायाः,
सौभाग्यदं सुललितं पठति प्रभाते ।
तस्मै ददाति ललिता झटिति प्रसन्ना,
विद्यां श्रियं विमलसौख्यमनन्तकीर्तिम् ॥

## मन्त्रमातृकापुष्पमालास्तवः

कल्लोलोल्लसितामृताब्धिलहरीमध्येविराजन्मणि-
द्वीपे कल्पकवाटिकापरिवृते कादम्बवाट्युज्ज्वले ।
रत्नस्तम्भसहस्रनिर्मितसभामध्येविमानोत्तमे
चिन्तारत्नविनिर्मितं जननि ते सिंहासनं भावये ॥१ ॥
एणाङ्कानलभानुमण्डललसच्छ्रीचक्रमध्ये स्थितां
बालार्कद्युतिभासुरां करतलैः पाशांकुशौ बिभ्रतीम् ।
चापं बाणमपि प्रसन्नवदनां कौसुम्भवस्त्रान्वितां
तां त्वां चन्द्रकलावतंसमुकुटां चारुस्मितां भावये ॥२ ॥
ईशानादिपदं शिवैकफलकं रत्नासनं ते शुभं
पाद्यं कुंकुमचन्दनादिभरितैरर्घ्यं सरत्नाक्षतैः ।
शुद्धैराचमनीयकं तव जलैर्भक्त्या मया कल्पितं
कारुण्यामृतवारिधे तदखिलं सन्तुष्टये कल्पताम् ॥३ ॥

लक्ष्ये योगिजनस्य रक्षितजगज्जाले विशालेक्षणे

प्रालेयाम्बुपटीरकुंकुमलसत्कर्पूरमिश्रोदकैः ।

गोक्षीरैरपि नारिकेलसलिलैः शुद्धोदकैर्मन्त्रितैः

स्नानं देवि धिया मयैतदखिलं सन्तुष्टये कल्पताम् ॥४ ॥

ह्रींकाराङ्कितमन्त्रलक्षिततनो हेमाचलात्सञ्चितै

रत्नैरुज्ज्वलमुत्तरीयसहितं कौसुम्भवर्णांशुकम् ।

मुक्तासन्ततियज्ञसूत्रममलं सौवर्णतन्तूद्भवं

दत्तं देवि धिया मयैतदखिलं सन्तुष्टये कल्पताम् ॥ ५ ॥

हंसैरप्यति लोभनीयगमने हारावलीमुज्ज्वलां

हिन्दोलद्युतिहीरपूरिततरे हेमाङ्गदे कङ्कणे ।

मञ्जीरौ मणिकुण्डले मुकुटमप्यर्धेन्दुचूडामणिं

नासामौक्तिकमंगुलीयकटकौ काञ्चीमपि स्वीकुरु ॥६ ॥

सर्वाङ्गे घनसारकुंकुमघनश्रीगन्धपङ्काङ्कितं

कस्तूरीतिलकं च फालफलके गोरोचनापत्रकम् ।

गण्डादर्शनमण्डले नयनयोर्दिव्याञ्जनं तेञ्चितं

कण्ठाब्जे मृगनाभिपङ्कममलं त्वत् प्रीतये कल्पताम् ॥७ ॥

कह्लारोत्पलमल्लिकामरुबकैः सौवर्णपङ्केरुहैर -

जातीचम्पकमालतीबकुलकैर्मन्दारकुन्दादिभिः ।

केतक्या करवीरकैर्बहुविधैः क्लृप्ताः स्रजोमालिकाः

सङ्कल्पेन समर्पयामि वरदे सन्तुष्टये गृह्यताम् ॥८ ॥

हन्तारं मदनस्य नन्दयसि यैरङ्गैरनङ्गोज्ज्वलैर्-

यैर्भृङ्गावलिनीलकुन्तलभरैर्बध्नासि तस्याशयम् ।

तानीमानि तवाम्ब कोमलतराण्यामोदलीलागृहाण्

यामोदाय दशाङ्गगुग्गुलुवृतैर्धूपैरहं धूपये ॥९ ॥

लक्ष्मीमुज्जवलयामि रत्ननिवहोद्भास्वत्तरे मन्दिरे

मालारूपविलम्बितैर्मणिमयस्तम्भेषु सम्भावितैः ।

चित्रैर्हाटकपुत्रिकाकरधृतैर्गव्यैर्घृतैर्वर्धितैर्-

दिव्यैर्दीपगणैर्धिया गिरिसुते सन्तुष्टये कल्पताम् ॥१० ॥

ह्रींकारेश्वरि तप्तहाटककृतैः स्थाली सहस्रैर्भृतं

दिव्यान्नं घृतसूपशाकभरितं चित्रान्नभेदं तथा ।

दुग्धान्नं मधुशर्करादधियुतं माणिक्यपात्रे स्थितं

माषापूपसहस्रमम्बसफलं नैवेद्यमावेदये ॥११ ॥

सच्छायैर्वरकेतकीदलरुचा ताम्बूलवल्लीदलैः

पूगैर्भूरिगुणैः सुगन्धिमधुरैः कर्पूरखण्डोज्जवलैः ।

मुक्ताचूर्णविराजितैर्बहुविधैर्वक्त्राम्बुजामोदनैः

पूर्णारत्नकलाचिका तव मुदे न्यस्ता पुरस्तादुमे ॥१२ ॥

कन्याभिः कमनीयकान्तिभिरलङ्कारामलारार्तिका

पात्रे मौक्तिकचित्रपङ्क्तिविलसत्कर्पूरदीपावलिः ।

तत्तत्तालमृदङ्गगीतसहितं नृत्यत्पदाम्भोरुहं

मन्त्राराधनपूर्वकं सुविहितं नीराजनं गृह्यताम् ॥१३ ॥

लक्ष्मीमौक्तिकलक्षकल्पितसितच्छत्रं तु धत्ते रसा-

दिन्द्राणी च रतिश्च चामरवरे धत्ते स्वयं भारती ।

वीणामेणविलोचनाः सुमनसां नृत्यन्ति तद्रागवद्

भावैराङ्गिकसात्त्विकैः स्फुटरसं मातस्तदाकर्ण्यताम् ॥१४॥

ह्रींकारत्रयसंपुटेन मनुनोपास्ये त्रयीमौलिभिर्-

वाक्यैर्लक्ष्यतनो तव स्तुतिविधौ को वा क्षमेताम्बिके ।

संल्लापाः स्तुतयः प्रदक्षिणशतं सञ्चार एवास्तुते

संवेशो नमसः सहस्रमखिलं त्वत्प्रीतये कल्पताम् ॥१५॥

श्रीमन्त्राक्षरमालया गिरिसुतां यः पूजयेच्चेतसा

सन्ध्यासु प्रतिवासरं सुनियतस्तस्यामलंस्यान्मनः ।

चित्ताम्भोरुहमण्डपे गिरिसुता नृत्तं विधत्ते रसाद्

वाणीवक्त्रसरोरुहे जलधिजा गेहे जगन्मङ्गला ॥१६॥

इति गिरिवरपुत्रीपादराजीवभूषा

भुवनममलयन्ती सूक्तिसौरभ्यसारैः ।

शिवपदमकरन्दस्यन्दिनीयं निबद्धा

मदयतु कविभृङ्गान्मातृकापुष्पमाला ॥१७॥

इति श्री शङ्कर भगवत्पाद कृतं स्तोत्रं सम्पूर्णम्

# दुर्गाआपदुद्धाराष्टकम्

नमस्ते शरण्ये शिवे सानुकम्पे नमस्ते जगद्व्यापिके विश्वरूपे ।
नमस्ते जगद्वन्द्य-पादारविन्दे नमस्ते जगत्तारिणि त्राहि दुर्गे ॥१ ॥

नमस्ते जगच्चिन्त्यमान-स्वरूपे नमस्ते महायोगिविज्ञानरूपे ।
नमस्ते नमस्ते सदानन्दरूपे नमस्ते जगत्तारिणि त्राहि दुर्गे ॥२ ॥

अनाथस्य दीनस्य तृष्णातुरस्य भयार्तस्य भीतस्य बद्धस्यजन्तोः ।
त्वमेका गतिर्देवि निस्तारकर्त्री-नमस्ते जगत्तारिणि त्राहि दुर्गे ॥३ ॥

अरण्ये रणे दारुणे शत्रुमध्ये जलेसंकटे राजगेहे प्रवासे ।
त्वमेका गति-र्देवि निस्तारहेतु-र्नमस्ते जगत्तारिणि त्राहि दुर्गे ॥४ ॥

अपारे महादुस्तरेत्यन्तघोरे विपत्-सागरे मज्जतां देहभाजाम् ।
त्वमेका गतिर्देवि निस्तार- नौका नमस्ते जगत्तारिणि त्राहि दुर्गे ॥५ ॥

नमश्चण्डिके चण्डदोर्दण्ड-लीला-समुत्खण्डिता खण्डलाशेष-शत्रोः ।
त्वमेका-गतिर्विघ्न-सन्दोह-हर्त्री नमस्ते जगत्तारिणि त्राहि दुर्गे ॥६ ॥

त्वमेका सदाराधिता सत्यवादि-न्यनेकाखिला क्रोधना क्रोधनिष्ठा ।
इड़ापिंगलात्वं सुषुम्ना च नाडी नमस्ते जगत्तारिणि त्राहि दुर्गे ॥७ ॥

नमो देवि दुर्गे शिवे भीमनादे सदा-सर्व-सिद्धि-प्रदातृ-स्वरूपे ।
विभूतिः सतां कालरात्रि-स्वरूपे नमस्ते जगत्तारिणि त्राहि दुर्गे ॥८ ॥

विधिमुख-विबुधानां सिद्धविद्याधराणां
मुनिमनुजपशूनां वासनात्रासितानाम् ।
नरकगतियुतानां मोक्षमार्गस्थितानां
शरणमसि त्वमेका देवि दुर्गे प्रसीद ॥

सिद्धेश्वरतन्त्रे आपदुद्धाराष्टकं स्तोत्रं सम्पूर्णम्

# भवानीभुजंगप्रयातस्तोत्रम्

षडाधारपंकेरुहांतर्विराजत्सुषुम्नांतरालेऽतितेजोल्लसंतीम्
सुधामंडलं द्रावयंतीं पिबतीं सुधामूर्तिमीडेऽहमानंदरूपाम् ॥१ ॥

ज्वलत्कोटिबालार्कभासारुणांगीं सुलावण्यश्रृंङ्गारशोभाभिरामाम् ।
महापद्मकिंजलकमध्ये विराजत्त्रिकोणोल्लसन्तीं भजे श्रीभवानीम् ॥२ ॥

क्वणत्किंकिणीनूपुरोद्भासिरत्नप्रभालीढलाक्षार्द्रपादारविन्दाम् ।
अजेशाच्युताद्यैः सुरैः सेव्यमानां महोदेवि मन्मूर्ध्नि ते भावयामि ॥३ ॥

सुशोणांबराबद्धनीवीविराजन्महारत्नकाञ्चीकलापं नितंबम् ।
स्फुरद्दक्षिणावर्तनाभिं च तिस्रो वली रम्यते रोमराजीं भजेऽहम् ॥४ ॥

लसद्वृत्तमुत्तुङ्गमाणिक्यकुम्भोपमश्रीस्तनद्वंद्वमम्बांबुजाक्षीम् ।
भजे पूर्णदुग्धाभिरामं तवेदं महाहारदीप्तं सदा प्रस्नुतास्यम् ॥५ ॥

शिरीषप्रसूनोल्लसद्बाहुदंडैर्ज्वलद्बाणकोदण्डपाशांकुशैश्च ।
चलत्कंकणोदारकेयूरभूषोज्वलद्भिः स्फुरन्तीं भजे श्रीभवानीम् ॥६ ॥

शरत्पूर्णचन्द्रप्रभापूर्णबिंबाधरस्मेरवक्त्रारविंदश्रियं ते ।
सुरत्नावलीहारताटंकशोभां भजे सुप्रसन्नामहं श्रीभवानीम् ॥७ ॥

सुनासापुटं पद्मपत्रायताक्षं यजन्तः श्रियं दानदक्षं कटाक्षम् ।
ललाटोल्लसद्गन्धकस्तूरिभूषोज्ज्वलद्भिः स्फुरन्तीं भजे श्रीभवानीम् ॥८ ॥

चलत्कुण्डलं ते भ्रमद्भृङ्गवृन्दां घनस्निग्धधम्मिल्लभूषोज्ज्वलंतीम् ।
स्फुरन्मौलिमाणिक्यमध्येंदुरेखाविलासोल्लसद्दिव्यमूर्धानमीडे ॥९ ॥

स्फुरत्वम्ब बिम्बस्य मे हृत्सरोजे सदा वाङ्मयं सर्वतेजोमयंच ।
इति श्रीभवानीस्वरूपं तदेवं प्रपञ्चात्परं चातिसूक्ष्मं प्रसन्नम् ॥१० ॥

गणेशाणिमाद्याखिलैःशक्तिवृन्दैः स्फुरच्छ्रीमहाचक्रराजोल्लसन्तीम् ।
परां राजराजेश्वरीं त्वां भवानीं शिवांकोपरिस्थां शिवां भावयेऽहम् ॥११ ॥

त्वमर्कस्त्वमग्निस्त्वमिन्दुस्त्वमापस्त्वमाकाशभूवायवस्त्वं चिदात्मा ।
त्वदन्यो न कश्चित्प्रकाशोऽस्ति सर्वं सदानन्दसंवित्स्वरूपं तवेदम् ॥१२ ॥

गुरुस्त्वं शिवस्त्वं च शक्तिस्त्वमेव त्वमेवासि माता पिताऽसि त्वमेव ।
त्वमेवासि विद्या त्वमेवासि बुद्धिर्गतिर्मे मतिर्देवि सर्वं त्वमेव ॥१३ ॥

श्रुतीनामगम्यं सुवेदागमाद्यैर्महिम्नो न जानाति पारं तवेदम् ।
स्तुतिं कर्तुमिच्छामि ते त्वं भवानि क्षमस्वेदम्ब प्रमुग्धः किलाहम् ॥१४ ॥

शरण्ये वरेण्ये सुकारुण्यपूर्णे हिरण्योदराद्यैरगम्येऽतिपुण्ये ।
भवारण्यभीतं च मां पाहि भद्रे नमस्ते नमस्ते नमस्ते भवानि ॥१५ ॥

इति श्रीशंकराचार्य विरचितं स्तोत्रं संपूर्णम्

# शारदाभुंजगप्रयाताष्टकम्

सुवक्षोजकुम्भां सुधापूर्णकुम्भां, प्रसादावलम्बां प्रपुण्यावलम्बाम् ।
सदास्येन्दुबिम्बां सदानोष्ठबिम्बां, भजे शारदाम्बामजस्रं मदम्बाम् ॥१ ॥

कटाक्षे दयार्द्रां करे ज्ञानमुद्रां, कलाभिर्विनिद्रां कलापैः सुभद्राम् ।
पुरस्त्रीं विनिद्रां पुरस्तुङ्गभद्रां, भजे शारदाम्बामजस्रं मदम्बाम् ॥२ ॥

ललामाङ्कफालां लसद्गानलोलां, स्वभक्तैकपालां यशः श्रीकपोलाम् ।
करे त्वक्षमालां कनत्प्रत्नलोलां, भजे शारदाम्बामजस्रं मदम्बाम् ॥३ ॥

सुसीमन्तवेणीं दृशा निर्जितैणीं, रमत्कीरवाणीं नमद्वज्रपाणीम् ।
सुधामन्थरास्यां मुदा चिन्त्यवेणीं, भजे शारदाम्बामजस्रं मदम्बाम् ॥४ ॥

सुशान्तां सुदेहां दृगन्ते कचान्तां, लसत्सल्लताङ्गीमनन्तामचिन्त्याम् ।
स्मृतां तापसैः सर्गपूर्वस्थितां तां, भजे शारदाम्बामजस्रं मदम्बाम् ॥५ ॥

कुरङ्गे तुरंगे मृगेन्दे खगेन्द्रे, मराले मदेभे महोक्षेऽधिरूढाम् ।
महत्यां नवम्यां सदा सामरुपां, भजे शारदाम्बामजस्रं मदम्बाम् ॥६ ॥

ज्वलत्कान्तिवह्निं जगन्मोहनाङ्गीं, भजन्मानसाम्भोजसुभ्रान्तभृङ्गीम् ।
निजस्तोत्रसंगीतनृत्यप्रभाङ्गीं, भजे शारदाम्बामजस्रं मदम्बाम् ॥७ ॥

भवाम्भोजनेत्राजसंपूज्यमानां, लसन्मन्दहासप्रभावक्त्रचिह्नाम् ।
चलच्चञ्चलाचारुताटङ्ककर्णां, भजे शारदाम्बामजस्रं मदम्बाम् ॥८ ॥

( इति श्रीशंकराचार्य विरचितं स्तोत्रं संपूर्णम्)

# श्रीगौरी-दशकं स्तोत्रम्

लीलालब्ध-स्थापित-लुप्ताऽखिललोकां
लोकातीतैर्- योगिभिरन्तश्चिर - मृग्याम् ।
बालादित्यश्रेणिसमानद्युतिपुञ्जां
गौरीममम्बामम्बुरूहाक्षीमहमीडे ॥१ ॥

आशापाश-क्लेशविनाशं विदधानां
पादाम्भोज-ध्यान-पराणां पुरुषाणाम् ।
ईशामीशार्धांगहरां तामभिरामां
गौरीमम्बामम्बुरूहाक्षीमहमीडे ॥२ ॥

नानाकारैः शक्तिकदम्बैर् भुवनानि
व्याप्य स्वैरं क्रीडति येयं स्वयमेका ।
कल्याणीं तां कल्पलतामानतिभाजां,
गौरीमम्बामम्बुरूहाक्षीमहमीडे ॥३ ॥

मूलाधारादुत्थितवीथ्या विधिरन्ध्रं
सौरंचान्द्रं व्याप्य विहारोज्ज्वलितांगीम् ।
येयं सूक्ष्मात्सूक्ष्मतनुस्तां सुखरूपाम्
गौरीमम्बाम्बुरूहाक्षीमहमीडे ॥४ ॥

यस्यामोतं प्रोतमशेषं मणिमाला
सूत्रे यदवत् क्वापि चरञ्चाप्यचरञ्च ।
तामध्यात्मज्ञानपदव्यां गमनीयां
गौरीमम्बामम्बुरूहाक्षीमहमीडे ॥५ ॥

प्रत्याहारध्यानसमाधिस्थितिभाजां
नित्यं चित्ते निर्वृतिकाष्ठां कलयन्तीम् ।

सत्यज्ञानानन्दमयीं तां तनुमध्यां
गौरीमम्बामम्बुरूहाक्षीमहमीडे ॥६ ॥

चन्द्रापीडानन्दितमन्दस्मितवक्त्रां
चन्द्रापीडालंकृतनीलालकभाराम् ।

इन्द्रोपेन्द्राद्यर्चितपादाम्बुजयुग्मां
गौरीमम्बामम्बुरूहाक्षीमहमीडे ॥७ ॥

आदिक्षान्तामक्षरमूर्त्या विलसन्तीं
भूते भूते भूतकदम्बप्रसवित्रीम् ।

शब्दब्रह्मानन्दमयीं तां तडिदाभां
गौरीमम्बामम्बुरूहाक्षीमहमीडे ॥८ ॥

यस्या: कुक्षौ लीनमखण्डं जगदण्डं
भूयो भूय: प्रादुरभूदुत्थितमेव ।

पत्या सार्धं राजतशैले विहरन्तीं
गौरीमम्बामम्बरूहाक्षीमहमीडे ॥९ ॥

नित्य: शुद्धो निष्कल एको जगदीश:
साक्षी यस्या: सर्गविधौ संहरणेच ।

विश्वत्राणक्रीडनलोलां शिवपत्नीं
गौरीमम्बामम्बुरूहाक्षीमहमीडे ॥१० ॥

प्रात:काले भावविशुद्धिं विदधानो
भक्त्या नित्यं जल्पति गौरी-दशकं य: ।

वाचां सिद्धिं संपदमुच्चै: शिव-भक्तिं
तस्यावश्यं पर्वत-पुत्री विदधाति ॥११ ॥

इति श्रीशंकराचार्य विरचितं गौरीदशकं संपूर्णम्

# आनन्दलहरी

भवानि स्तोतुं त्वां प्रभवति चतुर्भिर्न वदनैः

प्रजानामीशानस्त्रिपुरमथनः पञ्चभिरपि ।

न षड्भिः सेनानीर्दशशतमुखैरप्यहिपतिः

तदान्येषां केषां कथय कथमस्मिन्नवसरः ॥१ ॥

घृतक्षीरद्राक्षामधुमधुरिमा कैरपि पदैः

विशिष्यानाख्येयो भवति रसनामात्रविषयः ।

तथा ते सौन्दर्यं परमशिवदृङ्मात्रविषयः

कथंकारं ब्रुमः सकलनिगमागोचरगुणे ॥२ ॥

मुखे ते ताम्बूलं नयनयुगले कज्जलकला

ललाटे काश्मीरं विलसति गले मौक्तिकलता ।

स्फुरत्काञ्ची शाटी पृथुकटितटे हाटकमयी

भजामि त्वां गौरीं नगपतिकिशोरीमविरतम् ॥३ ॥

विराजन्मन्दारद्रुमकुसुमहारस्तनतटी

नदद्वीणानादश्रवणविलसत्कुण्डलगुणा ।

नताङ्गी मातङ्गी रुचिरगतिभङ्गी भगवती

सती शंभोरम्भोरुहचटुलचक्षुर्विजयते ॥४ ॥

नवीनार्कभ्राजन्मणिकनकभूषापरिकरैः

वृताङ्गी सारङ्गीरुचिरनयनाङ्गीकृतशिवा ।

तटित्पीता पीताम्बरललितमञ्जीरसुभगा

ममापर्णा पूर्णा निरवधिसुखैरस्तु सुमुखी ॥५ ॥

हिमाद्रेः संभूता सुललितकरैः पल्लवयुता
सुपुष्पा मुक्ताभिर्भ्रमरकलिता चालकभरैः ।
कृतस्थाणुस्थाना कुचफलनता सूक्तिसरसा
रुजां हन्त्री गन्त्री विलसति चिदानन्दलतिका ॥६ ॥

सपर्णामाकीर्णां कतिपयगुणैः सादरमिह
श्रयन्त्यन्ये वल्लीं मम तु मतिरेवं विलसति ।
अपर्णैका सेव्या जगति सकलैर्यत्परिवृतः
पुराणोऽपि स्थाणुः फलति किल कैवल्यपदवीम् ॥७ ॥

विधात्री धर्माणां त्वमसि सकलाम्नायजननी
त्वमर्थानां मूलं धनदनमनीयाङ्घ्रि कमले ।
त्वमादिः कामानां जननि कृतकन्दर्पविजये
सतां मुक्तेर्बीजं त्वमसि परमब्रह्ममहिषी ॥८ ॥

प्रभूता भक्तिस्ते यदपि न ममालोलमनसः
त्वया तु श्रीमत्या सदयमवलोक्योऽहमधुना ।
पयोदः पानीयं दिशति मधुरं चातकमुखे
भृशं शङ्के किंवा विधिभिरनुनीता मम मतिः ॥९ ॥

कृपापाङ्गालोकं वितर तरसा साधुचरिते
न ते युक्तोपेक्षा मयि शरणदीक्षामुपगते ।
न चेदिष्टं दद्यादनुपदमहो कल्पलतिका
विशेषः सामान्यैः कथमितरवल्लीपरिकरैः ॥१० ॥

महान्तं विश्वासं तव चरणपङ्केरुहयुगे

निधायान्यन्नैवाश्रितमिह मया दैवतमुमे ।

तथापि त्वच्चेतो यदि मयि न जायेत सदयं

निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥११ ॥

अय: स्पर्शे लग्नं सपदि लभते हेमपदवीं

यथा रथ्यापाथ: शुचि भवति गङ्गौघमिलितम् ।

तथा तत्तत्-पापैरतिमलिनमन्तर्मम यदि

त्वयि प्रेम्णा सक्तं कथमिव न जायेत विमलम् ॥१२ ॥

त्वदन्यस्मादिच्छाविषयफललाभे न नियम:

त्वमज्ञानामिच्छाधिकमपि समर्था वितरणे ।

इति प्राहु: प्राञ्च: कमलभवनाद्यास्त्वयि मन:

त्वदासक्तं नक्तंदिवमुचितमीशानि कुरु तत् ॥१३ ॥

स्फुरन्नानारत्नस्फटिकमयभित्तिप्रतिफल-

त्वदाकारं चञ्चच्छशधरकलासौधशिखरम् ।

मुकुन्दब्रह्मेन्द्रप्रभृतिपरिवारं विजयते

तवागारं रम्यं त्रिभुवनमहाराजगृहिणि ॥१४ ॥

निवास: कैलासे विधिशतमखाद्या: स्तुतिकरा:

कुटुम्बं त्रैलोक्यं कृतकरपुट: सिद्धिनिकर: ।

महेश: प्राणेशस्तदवनिधराधीशतनये

न ते सौभाग्यस्य क्वचिदपि मनागस्ति तुलना ॥१५ ॥

वृषो वृद्धो यानं विषमशनमाशा निवसनं

श्मशानं क्रीडाभूर्भुजगनिवहो भूषणविधि: ।

समग्रा सामग्री जगति विदितैव स्मररिपोः

यदेतस्यैश्वर्यं तव जननि सौभाग्यमहिमा ॥१६ ॥

अशेषब्रह्माण्डप्रलयविधिनैसर्गिकमतिः

श्मशानेश्वासीनः कृतभसितलेपः पशुपतिः ।

दधौकण्ठे हालाहलमखिलभूगोल कृपया

भवत्याः संगत्याः फलमिति च कल्याणि कलये ॥१७ ॥

त्वदीयं सौन्दर्यं निरतिशयमालोक्य परया

भियैवासीद्गङ्गा जलमयतनुः शैलतनये ।

तदेतस्यास्तस्माद्वदनकमलं वीक्ष्य कृपया

प्रतिष्ठामातन्वन्निजशिरसि वासेन गिरिशः ॥१८ ॥

विशालश्रीखण्डद्रवमृगमदाकीर्णघुसृण-

प्रसूनव्यामिश्रं भगवति तवाभ्यङ्गसलिलं ।

समादाय स्त्रष्टा चलितपदपांसून्निजकरैः

समाधत्ते सृष्टिं विबुधपुरपङ्केरुहदृशाम् ॥१९ ॥

वसन्ते सानन्दे कुसुमितलताभिः परिवृते

स्फुरन्नाना पद्मे सरसिकलहंसालिसुभगे ।

सखीभिः खेलन्तीं मलयपवनान्दोलितजले

स्मरेद्यस्त्वां तस्य ज्वरजनित पीडापसरति ॥२० ॥

इति श्रीमच्छकराचार्य विरचितं आनन्दलहरी स्तोत्रं संपूर्ण

# शिवकामसुन्दरी स्तोत्रम्

पुण्डरीकपुरमध्यवासिनीं
नृत्तराजसहधर्मचारिणीम् ।
अद्रिराजतनयां दिनेदिने
चिन्तयामि शिवकामसुन्दरीम् ॥१ ॥

ब्रह्मविष्णुमुखरामरेडितां
बाहुपद्मशुकवत्सशोभिताम् ।
बाहुलेयकलभाननात्मजां
चिन्तयामि शिवकामसुन्दरीम् ॥२ ॥

वेदशीर्षविनुतात्मवैभवां
वाञ्छितार्थफलदानतत्पराम् ।
व्याससूनृ मुखतापसार्चितां
चिन्तयामि शिवकामसुन्दरीम् ॥३ ॥

विश्वयोनिममलामनुत्तमां
वाग्विलासफलदां विचक्षणाम् ।
वारिवाहसहशालकाम्बरां
चिन्तयामि शिवकामसुन्दरीम् ॥४ ॥

सोमसूर्यहुतभुग्विलोचनां
सर्वमोहनकरीं सुधीडिताम् ।
सत्रिवर्गपरमात्मसौख्यदां
चिन्तयामि शिवकामसुन्दरीम् ॥५ ॥

# कुमारी तर्पण स्तोत्रम्

द्वाद्शान्ताब्ज - योगांगीं कुमारीं श्री सरस्वतीम् ।
तर्पयामि कुलद्रव्यै: शिव संतोष हेतवे ॥१ ॥

चिन्मूलाधारकमले चतुर्दलविलासिनीम् ।
वाग्बीजेन तर्पयामि सद्योमोक्षाय केवलम् ॥२ ॥

स्वाधिष्ठानषड्दलान्ते विष्णु संकेतगामिनीम् ।
मल प्रक्षालिनीमम्बां सद् बुद्धयै: तर्पयाम्यहम् ॥३ ॥

मणिपूराब्जमध्ये तां मनोहरकलेवरम् ।
उमादेवीं तर्पयामि ज्वालामालासमाकुलाम् ॥४ ॥

अनाहतस्थितां रौद्रीं द्वादशार्कसमप्रभाम् ।
मायाबीजेन कौमारीं तर्पयामि कुलेश्वरीम् ॥५ ॥

विशुद्धिपद्ममध्यस्थां ललज्जिह्वां च खेचरीम् ।
षोडशस्वरसंसिद्धां भैरवीं तर्पयाम्यहम् ॥६ ॥

आज्ञाचक्रे द्विपत्रे तां मातृकावनहंसिकाम् ।
बोधमुक्ताफलैर्देवीं तर्पयामि मनोन्मनीम् ॥७ ॥

सहस्रकमले पूर्णां शिवशक्तैक्यरूपिणीम् ।
श्रीं बीजार्चितां देवीं तर्पयामि शिवामृतै : ॥८ ॥

मूलात् प्ररोहेग्निशिखा समानां
प्रत्यावरोहेप्यमृतायमानाम् ।
कुलोत्थपन्थामनु सञ्चरन्तीं
कुमारिकन्यां शरणं प्रपद्ये ॥
संविन्मयीं तां शरणं प्रपद्ये ॥९

# नवरत्नमाला स्तुतिः

ओंकारपॅजरशुकीं उपनिषदुद्यानकेलिकलकण्ठीम् ।
आगमविपिनमयूरीं आर्यामनन्तर्विभावये गौरीम् ॥१ ॥

दयमानदीर्घनयनां देशिकरूपेण दर्शिताभ्युदयाम् ।
वामकुचनिहितवीणां वरदां संगीतमातृकां वन्दे ॥२ ॥

श्यामलिम सौकुमार्यां आनन्दामन्द संपदुन्मेषाम् ।
तरुणिमकरुणापूरां मदजलकल्लोललोचनां वन्दे ॥३ ॥

नखमुख मुखरित वीणानाद-रसास्वादनव नवोल्लासाम् ।
मुखमम्ब मोदयतु मे मुक्तताटंकमुग्धहसितं ते ॥४ ॥

सरिगमपधनिरतां तां वीणासंक्रान्त-कान्तहस्तां ताम् ।
शान्तां मृदुलस्वान्तां गुरुवरभूतां नमामि शिवकान्ताम् ॥५ ॥

अवटुतटघटित चूलीपालीं तालीपलाशताटंकाम्
वीणावादन वेलाकंपितशिरसां नमामि मातंगीम् ॥६ ॥

वीणारवानुषंगं विकचमदामोद-माधुरीभंगम् ।
करुणापूर तरंगं कलये मातंग कन्यकापांगम् ॥७ ॥

मणिभंगमेचकांगीं मातंगीं नौमि सिद्धमातंगीम् ।
यौवन-वनसारंगीं संगीतांभोरुहानुभव भृंगीम् ॥८ ॥

मेचकमासेचनकं मिथ्यादृष्टान्तमध्यभागं तम् ।
मातस्तव स्वरूपं मंगलसंगीतसौरभं मन्ये ॥९ ॥

# शान्तिस्तवः

यस्या नित्यं चरणकमल-द्वन्द्व-मैश्वर्यबीजं,

संध्यायन्तो हृदय कमले शुद्धसंवित् स्वरूपम् ।

निर्द्वन्द्वं तत् समरसमहो प्राप्य तिष्ठन्ति तस्मिन्,

तस्यै देव्यै तपनरुचये तत्त्वतोस्तु प्रणामः ॥

कालदेशकलनाविवर्जिता स्वेच्छयैव भुवनान्यजीजनत् ।

क्रीडति स्वयमनेकभूमिका सा शिवाहमिति शान्तिमाश्रये ॥१ ॥

स्वप्रकाशशिवशक्तिरूपिणी सर्वभूतहृदयाब्जहंसिका ।

निष्प्रकारसुखव्योमसंचरी सा शिवाहमिति शान्तिमाश्रये ॥२ ॥

या परादिवचसामगोचरा रूपनामरहिता परा वरा ।

या त्रयीप्रमुखमार्गदर्शिनी सा शिवाहमिति शान्तिमाश्रये ॥३ ॥

इन्द्रियार्थसुखबोधबोधिनी चन्द्रभानुशिखिदीप्तिकारिणी ।

बन्धवर्गभयमोहमोचिनी सा शिवाहमिति शान्तिमाश्रये ॥४ ॥

पञ्चकोशघन - मुक्तचन्द्रिका पञ्चभूतजडविश्वदीपिका ।

पञ्चमूर्तिरव बिन्दुनायिका सा शिवाहमिति शान्तिमाश्रये ॥५ ॥

यत्र नास्ति निखिलं चराचरं ह्येकरूपरसवस्त्वभेदतः ।

नेति - नेति- विधिवाक्यबोधिता सा शिवाहमिति शान्तिमाश्रये ॥६ ॥

चिद्विलासजगदेकरूपिणी ह्यस्तिभातिसुखरूपसत्तया ।

षड्विकाररहिता निराश्रया सा शिवाहमिति शान्तिमाश्रये ॥७ ॥

जाग्रदादिसमयेषु वृत्तिषु भ्राजते तनुषु सर्वसाक्षिणी ।

स्वर्णवत् सकलभूषणेषु या सा शिवाहमिति शान्तिमाश्रये ॥८ ॥

कोटि - कोटिजनिपुण्य - संस्कृत: सर्वकाम - रहितो जितेन्द्रिय: ।

यां विभाव्य परिमुच्यते भवात् सा शिवाहमिति शान्तिमाश्रये ॥९ ॥

शास्त्र - पाठमननैर्न लभ्यते धैर्यवीर्यनयत: पराक्रमै : ।

केवलं गुरुदृशा प्रकाशते सा शिवाहमिति शान्तिमाश्रये ॥१० ॥

या गुरूक्तिसुधया मनोमले क्षालिते स्फुरणरूप सन्मणि: ।

द्योतते सपदि संविदात्मिका सा शिवाहमिति शान्तिमाश्रये ॥११ ॥

देहजीवजगदीशबाधने शिष्यते स्वयमनन्तरूपिणी ।

व्यापिनी जगति संततं च या सा शिवाहमिति शान्तिमाश्रये ॥१२ ॥

देहमान - दलितस्य योगिन: सर्वतोऽपि परिपूर्णकामना ।

भाति या परम - गुप्तरूपिणी सा शिवाहमिति शान्तिमाश्रये ॥१३ ॥

इन्द्रजालमिदमल्पकालिकं विश्वमेवमिति निश्चयात्मन: ।

बोधरूपत इहैव भाति या सा शिवाहमिति शान्तिमाश्रये ॥१४ ॥

प्राणबन्धपरिशुद्धचेतसां निर्विकल्पसुखरूपिणी सदा ।

चिन्मयी सदसदात्मिका च या सा शिवाहमिति शान्तिमाश्रये ॥१५ ॥

ब्रह्मलोकतृणमानिने सदा तृप्तिरूपपरशान्तिदायिनी ।

योगिने समरसं ददाति या सा शिवाहमिति शान्तिमाश्रये ॥१६ ॥

शान्तिस्तवं पठति नित्यमनन्यभक्त्या

यो मानवो भवति शंकर एव साक्षात्

संसार दु:ख - भय - मोचनदक्ष - कल्पं

स्वात्मापरोक्षकरणे गुरुपादकल्पम् ॥

(इति श्रीत्यागराजविरचितं स्तोत्रं संपूर्णम्)

# प्रलापस्तुतिः

विरिंच्यादिभिः पञ्चभिर्लोकपालैः समूढे महानन्दपीठे निषण्णम् ।
धनुर्बाण-पाशांकुश-प्रोत-हस्तं महस्त्रैपुरं शङ्कराद्वैतमव्यात् ॥१ ॥

यदन्नादिभिः पञ्चभिः कोशजालैः शिरः - पक्षपुच्छात्मकैरन्तरन्तः ।
निगूढे महायोगपीठे निषण्णं पुरारेरथान्तः पुरं नौमि नित्यम् ॥२ ॥

विरिच्यादिरूपै प्रपञ्चे विहृत्य स्वतन्त्रा यदा स्वात्मविश्रान्तिरेषा ।
तदा मान-मातृ प्रमेयातिरिक्तं परानन्दमीडे भवानि त्वदीयम् ॥३ ॥

विनोदाय चैतन्यमेकं विभज्य द्विधा देवि जीवः शिवश्चेति नाम्ना ।
शिवस्यापि जीवत्वमापादयन्ती पुनर्जीवमेनं शिवं वा करोषि ॥४ ॥

समाकुंच्य मूलं हृदिन्यस्य वायुं मनोभ्रूबिलं प्रापयित्वा निवृत्ताः ।
ततः सच्चिदानन्दरूपे पदे ते भवत्यम्ब जीवाः शिवत्वेन केचित् ॥५ ॥

शरीरेतिकष्टे रिपौ पुत्रवर्गे सदा भीतिमूले कलत्रे धने वा ।
न कश्चिद् विरज्यत्यहो देवि चित्रं कथं त्वत्कटाक्षं विना तत्त्वबोधः ॥६ ॥

मृषान्यो मृषान्यः परोमिश्रमेनं परः प्राकृतं चापरो बुद्धिमात्रम् ।
प्रपञ्चं मिमीते मुनीनां गणोयं तदेतत् त्वमेवेति न त्वां जहीमः ॥७ ॥

निवृत्तिः प्रतिष्ठा च विद्या च शान्तिस्तथा शान्त्यतीतेति पञ्चीकृताभिः ।
कलाभिः परे पञ्चविंशात्मिकाभि-स्त्वमेकैव सेव्या शिवाभिन्नरूपा ॥८ ॥

कदा वा भवत्पादपोतेन तूर्णं भवांभोधिमुत्तीर्य पूर्णान्तरंगः ।
निमज्जन्तमेनं दुराशाविषाब्धौ समालोक्य लोकं कथं पर्युदास्से ॥९ ॥

कदा वा हृषीकाणि साम्यं भजेयुः कदा वा न शत्रुर्नमित्रं भवानि ।
कदा वा दुराशा-विषूची-विलोपः कदा वा मनो मे समूलं विनश्येत् ॥१० ॥

नमो वाकमाशास्महे देवि युष्मत् पदांभोजयुग्माय तिग्माय गौरि ।
विरिंच्यादि-भास्वत्-किरीटप्रतोली-प्रदीपायमान-प्रभाभास्वराय ॥११ ॥

सुधासिन्धुसारे चिदानन्दनीरे समुत्फुल्लनीपे सुरत्नान्तरीपे ।
मणिव्यूहसाले स्थिते हैमशाले मनोजारिवामे निषण्णं मनो मे ॥१२॥

दृगन्ते विलोला सुगन्धीषुमाला प्रपञ्चेन्द्रजाला विपत्सिन्धुकूला ।
मुनिस्वान्तशाला नमल्लोकपाला हृदिप्रेमलोलामृतस्वादुलीला ॥१३॥

जगज्जालमेतत्त्वयैवाम्ब सृष्टं त्वमेवाद्य यासीन्द्रियैरर्थजालम् ।
त्वमेकैव कर्त्री त्वमेकैव भोक्त्री न मे पुण्यपापे न मे बन्धमोक्षौ ॥१४॥

इति प्रेमभारेण किञ्चिन्मयोक्तं न बुद्ध्वैव तत्त्वं मदीयं त्वदीयम् ।
विनोदाय बालस्य मौर्ख्यं हि मातस्तदेतत् प्रलापस्तुतिं मे गृहाण ॥१५॥

(इति श्रीशंकराचार्यविरचितं स्तोत्रं संक्षिप्तम्)

## श्रीसूक्तार्थसंग्रह :

हिरण्यं विष्णुराख्यातस्तस्य वर्णस्तु वैष्णवी ।
लक्ष्मीर्हिरण्यवर्णेति श्रूयते कनकप्रभा ॥१॥

हरिणीं तु हरेः पत्नीं दारिद्र्यपरिहारिणीम् ।
प्रपद्येऽहं हरिद्राभां हरिणाक्षीं हिरण्मयीम् ॥२॥

हिरण्यरेतसः शम्भोः शक्तिः प्रोक्ता हिरण्मयी ।
धनार्थिभिरुपास्यैषा जातवेदसि सर्वदा ॥३॥

चतुरङ्गबलोपेतां धनधान्य सुखेश्वरीम् ।
अश्वारूढामहं वन्दे राजलक्ष्मीं हिरण्मयीम् ॥४॥

देवैर्जुष्टामुदारां च पद्मिनीमीं भजाम्यहम् ।
त्वां वृणे त्वत्प्रसादेन ममालक्ष्मीर्विनश्यतु ॥५॥

उद्यदादित्यसङ्काशां बिल्वकाननमध्यगाम् ।
तनुमध्यां श्रियं ध्यायेदलक्ष्मीपरिहारिणीम् ॥६॥

कुबेरस्तपसा पूर्वं तोषयामास शङ्करम् ।
शिवार्थं तु महालक्ष्मी : कुबेरस्य वशे स्थिता ॥७ ॥

तस्माद्धि भक्तवात्सल्यं श्रीदेव्याः प्रकटीकृतम् ।
अनुगृह्णाति यं यं श्रीस्तं कुबेरोऽनुधावति ॥८ ॥

खड्गं सवातचक्रञ्च कमलं वरमेव च ।
करैश्चतुर्भिर्बिभ्राणां ध्यायेच्चन्द्राननां श्रियम् ॥९ ॥

गोवृन्दानुगतां ध्यात्वा सुरभिं सस्यमालिनीम् ।
पृथुलां प्राणिनामीशां दुर्धर्षां श्रियमर्चयेत् ॥१० ॥

तां ध्यायेत् सत्यसङ्कल्पां लक्ष्मीं क्षीरौदनप्रियाम् ।
ख्यातां सर्वेषु भूतेषु तत्तज्ज्ञानबलक्रियाम् ॥११ ॥

सवत्सागौरिव प्रीतां कर्दमेन तथेन्दिरां ।
कल्याणी मद्गृहे नित्यं निवसेत् पद्ममालिनीं ॥१२ ॥

चिक्लीत श्रीसुत स्वामिन्-श्चिरं निवस मद्गृहे ।
मत्कुले सुचिरं तिष्ठ मच्चित्ते सन्निधिं कुरु ॥१३ ॥

त्वदागमनमात्रेण त्वन्माता त्वामनुव्रजेत् ।
श्री देवीं तां मम गृहे चिरम् वासय मातरम् ॥१४ ॥

तां स्मरेदभिषेकार्द्रां पुष्टिदां पुष्टिरूपीणिम् ।
सूर्यामैश्वर्यरूपां च सावित्रीं सूर्यरूपीणिम् ॥१५ ॥

आत्मसज्ञां च चिद्रूपां ज्ञानदृष्टिस्वरूपिणीम् ।
स्वर्णात्मनाविर्भूतां च जातवेदो म आवह ॥१६ ॥

**हिरण्मयीं महालक्ष्मीं ऋग्भिः संपूजयेन्नरः ।**
**पूर्णानन्दप्रतिष्ठां च प्राप्नोत्येव न संशयः ॥१७ ॥**

# श्रीसरस्वतीदशश्लोकी

या वेदान्तार्थतत्त्वैक - स्वरूपा परमार्थत: ।
नामरूपात्मना व्यक्ता सा मां पातु सरस्वती ॥१ ॥

या सांगोपांगवेदेषु चतुर्ष्वेकैव गीयते ।
अद्वैता ब्रह्मण: शक्ति: सा मां पातु सरस्वती ॥२ ॥

या वर्णपदवाक्यार्थ - स्वरूपा परमार्थत: ।
अनादिनिधनानन्ता सा मां पातु सरस्वती ॥३ ॥

अध्यात्ममधिदैवं च देवानां सम्यगीश्वरी ।
प्रत्यगास्ते वदन्ती या सा मां पातु सरस्वती ॥४ ॥

अन्तर्याम्यात्मना विश्वं त्रैलोक्यं या नियच्छति ।
रूद्रादित्यादिरूपस्था सा मां पातु सरस्वती ॥५ ॥

या प्रत्यग् दृष्टिभिर् जीवैर् व्यज्यमानानुभूयते ।
व्यापिनी ज्ञप्तिरूपैका सा मां पातु सरस्वती ॥६ ॥

नाम-जात्यादिभिर् भेदैरष्टधा या विकल्पिता ।
निर्विकल्पात्मना व्यक्ता सा मां पातु सरस्वती ॥७ ॥

व्यक्ताव्यक्तगिर: सर्वे देवाद्या व्याहरन्ति याम् ।
सर्वकामदुधा धेनु: सा मां पातु सरस्वती ॥८ ॥

यां विदित्वाखिलं बन्धं निर्मथ्याखिलवर्त्मना ।
योगी याति परं स्थानं सा मां पातु सरस्वती ॥९ ॥

नामरूपात्मकं सर्वं यस्यामावेश्य तां पुन: ।
ध्यायन्ति ब्रह्मरूपैका सा मां पातु सरस्वती ॥१० ॥

# देव्यपराधक्षमापनस्तोत्रम्

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथा: ।
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ॥१ ॥
विधेरज्ञानेन द्रविणविरहेणालसतया
विधेयाशक्यत्वात् तव चरणयोर्या च्युतिरभूत् ।
तदेतत्क्षन्तव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥२ ॥
पृथिव्यां पुत्रास्ते जननि बहव: सन्ति सरला:
परं तेषां मध्ये विरलतरलोहं तव सुत: ।
मदीयोयं त्याग: समुचितमिदं नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥३ ॥
जगन् मातर्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवी द्रविणमपि भूयस्तव मया ।
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे
कुपुत्रो जायेत क्वाचिदपि कुमाता न भवति ॥४ ॥
परित्यक्त्वा देवान् विविधविधसेवा कुलतया
मया पञ्चाशीतेरधिकमपनीते तु वयसि ।
इदानीं चेन्मातस्तव यदि कृपा नापि भविता
निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥५ ॥
श्वपाको जल्पाको भवति मधुपाकोपमगिरा
निरातङ्को रङ्को विहरति चिरं कोटिकनकै: ।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदं
जन: को जानीते जननि जपनीयं जपविधौ ॥६ ॥

चिता भस्मालेपो गरलमशनं दिक्पटधरो
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः ।
कपाली भूतेशो भजति जगदीशैकपदवीं
भवानि त्वत्पाणिग्रहणपरिपाटीफलमिदम् ॥७ ॥

न मोक्षस्याकांक्षा भवविभववाञ्छापि च न मे
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः ।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडानी रुद्राणी शिव-शिव भवानीति जपतः ॥८ ॥

नाराधितासि विधिना विविधोपचारैः
किं रुक्षचिन्तनपरैर्न कृतं वचोभिः ।
श्यामे त्वमेव यदि किञ्चन मय्यनाथे
धत्से कृपामुचितमम्ब परं तवैव ॥९ ॥

आपत्सु मग्नः स्मरणं त्वदीयं, करोमि दुर्गे करुणार्णवेशिवे ।
नैतच्छठत्वं मम भावयेथाः क्षुधातृषार्ता जननीं स्मरन्ति ॥१० ॥

जगदम्ब विचित्रमत्र किं, परिपूर्णा करुणास्ति चेन्मयि ।
अपराधपरम्परावृतं, न हि माता समुपेक्षते सुतम् ॥११ ॥

मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि ।
एवं ज्ञात्वा महादेवि यथा योग्यं तथा कुरु ॥१२ ॥

इति श्रीशंकराचार्य विरचितं स्तोत्रम् संपूर्णम्


विष्णुस्तोत्राणि

# नारायण हृदयम्

ॐ अस्य श्री नारायणहृदयस्तोत्रमन्त्रस्य भार्गव ऋषि:। अनुष्टुप् छन्द:। श्री लक्ष्मीनारायणो देवता। श्री लक्ष्मीनारायणप्रीत्यर्थे जपे विनियोग: ॥

## अथ करन्यास: ॥

ॐ नारायण: परं ज्योतिरित्यङ्गुष्ठाभ्यां नम: ।ॐ नारायण: परं ब्रह्मेति तर्जनीभ्यां नम: ।ॐ नारायण: परो देवेति मध्यमाभ्यां नम: ।ॐ नारायण: परं धामोति अनामिकाभ्यां नम: ।ॐ नारायण: परो धर्म इति कनिष्ठिकाभ्यां नम: ।ॐ विश्वं नारायण: पर इति करतलकर पृष्ठाभ्यां नम:। एवं हृदयादिन्यास: ॥

## अथ ध्यानम् ॥

उद्यदादित्यसंकाशं वीतवाससमच्युतम्। शङ्खचक्रगदापाणिं ध्यायेल्लक्ष्मीपतिं हरिम् ॥ ॐ नमो भगवते नारायणाय इति मन्त्रं जपेत् ॥

## श्री वेदव्यास उवाच ॥

श्रीमन्नारायणो ज्योतिरात्मा नारायण: पर:।
नारायण: परं ब्रह्म नारायण नमोऽस्तु ते ॥१ ॥

नारायण: परो देवो दाता नारायण: पर:।
नारायण: परो ध्याता नारायण नमोऽस्तु ते ॥२ ॥

नारायण: परं धाम ध्येयो नारायण: पर:।
नारायण परो धर्मो नारायण नमोऽस्तु ते ॥३ ॥

नारायण: परो बोधो विद्या नारायण: परा।
विश्वं नारायण: साक्षान्नारायण नमोऽस्तु ते ॥४ ॥

नारायणाद्विधिर्जातो जातो नारायणाच्छिव:।
जातो नारायणादिन्द्रो नारायण नमोऽस्तु ते ॥५ ॥

रविर्नारायणं तेजश्चन्द्रो नारायणं मह:।
वह्निर्नारायण: साक्षान्नारायण नमोस्तु ते ॥६ ॥

नारायण उपास्य: स्याद्गुरुर्नारायण: पर: ।
नारायण परो बोधो नारायण नमोऽस्तु ते ॥७ ॥

नारायण: फलं मुख्यं सिद्धिर्नारायण: सुखम् ।
सर्वं नारायण शुद्धो नारायण नमोऽस्तु ते ॥८ ॥

नारायणस्त्वमेवासि नारायण: हृदि स्थित: ।
प्रेरक: प्रेर्यमाणानां त्वं प्रेरितमानस: ॥९ ॥

त्वदाज्ञा शिरसा धृत्वा जपामि जनपावनम् ।
नानोपासनमार्गाणां भावकृद्भावबोधक: ॥१० ॥

भावकृद्भाव-भूतोऽसौ मम सौख्यप्रदो भव ।
त्वन्मायामोहितं विश्वं त्वयैवपरिकल्पितिम् ॥११ ॥

त्वदधिष्ठानमात्रेण सैव सर्वार्थकारिणी ।
त्वमेवैतां पुरस्कृत्य मम कामान्समर्पय ॥१२ ॥

न मे त्वदन्यतस्त्राता त्वदन्यं न हि दैवतम् ।
त्वदन्यं न हि जानामि पालकं पुण्यरूपकम् ॥१३ ॥

यावत्सांसारिको भावो नमस्ते भावनात्मने
तत्सिद्धिदो भवेत्सद्य: सर्वथा सर्वदा विभो ॥१४ ॥

पापिनामहमेकाग्र्यो दयालूनां त्वमग्रणी: ।
दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये ॥१५ ॥

त्वयाऽप्यहं न सृष्टश्चेन्न स्यात्तव दयालुता ।
आमयो वा न सृष्टश्चेदौषधस्य वृथोदय: ॥१६ ॥

पापसंघपरिक्रान्त: पापात्मा पापरूपधृक् ।
त्वदन्य: कोऽत्र पापेभ्यस्त्राता मे जगतीतले ॥१७ ॥

त्वमेव माता च पिता त्वमेव त्वमेव-बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या च गुरुस्त्वमेव त्वमेव सर्वं मम देवदेव ॥१९ ॥

# षट्पदी स्तोत्रम्

अविनयमपनय विष्णो दमय मनः शमय विषयमृगतृष्णाम् ।
भूतदयां विस्तारय तारय संसारसागरतः ॥१

दिव्यधुनीमकरन्दे परिमलपरिभोगसच्चिदानन्दे ।
श्रीपतिपदारविन्दे भवभयखेदच्छिदे वन्दे ॥२

सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम् ।
सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः ॥३

उद्धृतनग नगभिदनुज दनुजकुलामित्र मित्रशशिदृष्टे ।
दृष्टे भवति प्रभवति न भवति किं भवतिरस्कारः ॥४

मत्स्यादिभिरवतारैरवतारवताऽवता वसुधाम् ।
परमेश्वर परिपाल्यो भवता भवतापभीतोऽहम् ॥५

दामोदर गुणमन्दिर सुन्दरवदनारविन्द गोविन्द ।
भवजलधिमथनमन्दर परमं दरमपनय त्वं मे ॥६

नारायण करुणामय शरणं करवाणि तावकौ चरणौ ।
इति षट्पदी मदीये वदनसरोजे सदा वसतु ॥७

इति श्रीशंकराचार्य रचितं स्तोत्रं संपूर्णम्

# भगवन्मानसपूजा

हृदम्भोजे कृष्णः सजलजलदश्यामलतनुः
सरोजाक्षः स्रग्वी मुकुटकटकाद्याभरणवान् ।
शरद्राकानाथप्रतिमवदनः श्रीमुरलिकां
वहन् ध्येयो गोपीगणपरिवृतः कुंकुमचितः ॥१

पयोम्भोधेर्द्वीपान्मम हृदयमायाहि भगवन्
मणिव्रात भ्राजत्कनकवरपीठं भज हरे ।
सुचिह्नौ ते पादौ यदुकुलज नेनेज्मि सुजलैः
गृहाणेदं दूर्वाफलजलवदर्घ्यं मुररिपो ॥२

त्वमाचामोपेन्द्र त्रिदशसरिदम्भोऽतिशिशिरं
भजस्वेमं पञ्चामृतचरितमाप्लाव मघहन् ।
द्युनद्याः कालिन्द्या अपि कनककुम्भस्थितमिदं
जलं तेन स्नानं कुरु कुरु कुरु स्वाचमनकम् ॥३

तडिद्वर्णे वस्त्रे भजविजयकान्ताधिहरण
प्रलम्बारिभ्रातर्मुदुलमुपवीतं कुरु गले ।
ललाटे पाटीरं मृगमदयुतं धारय हरे
गृहाणेदं माल्यं शतदलतुलस्यादिरचितम् ॥४

दशाङ्गं धूपं सद्वरदचरणाग्रेऽर्पितमये
मुखं दीपेनेन्दुप्रभेवरजसा देव कलये ।
इमौ पाणी वाणीपतिनुत सकर्पूररजसा
विशोध्याग्रे दत्तं सलिलमिदमाचाम नृहरे ॥५

सदातृप्तान्नं षड्रसवदखिलव्यञ्जनयुतं
सुवर्णे पात्रे: गोधृतचषकयुक्ते स्थितमिदम् ।
यशोदासूनो तत्परमदययाऽशान सखिभि:
प्रसादं वाञ्छद्भि: सह तदनु नीरं पिब विभो ॥६

सचन्द्रं ताम्बूलं मुखरुचिकरं भक्षय हरे
फलं स्वादु प्रीत्या परिमलवदास्वादय चिरम् ।
सपर्यापर्याप्त्यै कनकमणिजातं स्थितमिदं
प्रदीपैरारार्तिं जलधितनयाश्लिष्ट रचये ॥७

विजातीयै: पुष्पैरभिसुरभिभिबिल्व तुलसी-
युतैश्चेमं पुष्पाञ्चलिमजित ते मूर्ध्नि निदधे ।
तव प्रादक्षिण्य क्रमणमघविध्वंसि रचितं
चतुर्वारं विष्णो जनिपथगतिश्रान्तविदुषा ॥८

नमस्कारोऽष्टाङ्ग: सकलदुरितध्वंसनपटु:
कृतं नृत्यं गीतं स्तुतिरपि रमाकान्त त इमम् ।
तव प्रीत्यै भूयादहमपि च दासस्तव विभो
कृतं छिद्रं पूर्णं कुरु कुरु नमस्तेऽस्तु भगवन् ॥९

इति श्रीशकराचार्य रचितं स्तोत्रं संपूर्णम्

# कृष्णाष्टकम्

भजे व्रजैकमण्डलं समस्तपापखण्डनं
स्वभक्तचित्तरञ्जनं सदैव नन्दनन्दनम् ।
सुपिच्छगुच्छमस्तकं सुनादवेणुहस्तकं
अनङ्गरङ्गसागरं नमामि कृष्णनागरम् ॥

मनोजगर्वमोचनं विशाललोललोचनं
विधूतगोपशोचनं नमामि पद्मलोचनम् ।
करारविन्दभूधरं स्मितावलोकसुन्दरं
महेन्द्रमानदारणं नमामि कृष्णवारणम् ॥

कदम्बसूनकुण्डलं सुचारुगण्डमण्डलं
ब्रजाङ्गनैकवल्लभं नमामि कृष्णदुर्लभम् ।
यशोदया समोदया सगोपया सनन्दया
युतं सुखैकदायकं नमामि गोपनायकम् ॥

सदैव पादपङ्कजं मदीयमानसे निजं
दधानमुत्तमालकं नमामि नन्दबालकम् ।
समस्तदोषशोषणं समस्तलोकपोषणं
समस्तगोपमानसं नमामि कृष्णलालसम् ॥

भुवो भरावतारकं भवाब्धिकर्णधारकं
यशोमतीकिशोरकं नमामि दुग्धचोरकम् ।
दृगन्तकान्तभङ्गिनं सदासदालसङ्गिनं
दिने दिने नवं नवं नमामि नन्दसंभवम् ॥

गुणाकरं सुखाकरं कृपाकरं कृपावरं
सुरद्विषन्निकन्दनं नमामि गोपनन्दनम् ।
नवीनगोपनागरं नवीनकेलिलम्पटं
नमामि मेघसुन्दरं तडित्प्रभालसत्पटम् ।।

समस्तगोपनन्दनं हृदम्बुजैकमोहनं
नमामि कुञ्जमध्यगं प्रसन्नभानुशोभनम् ।।
निकामकामदायकं दृगन्तचारुसायकं
रसालवेणुगायकं नमामि कुञ्जनायकम् ।।

विदग्धगोपिकामनोमनोज्ञतल्पशायिनं
नमामि कुञ्जकानने प्रवृद्धवह्निपायिनम् ।।
यदा तदा यथा तथा तथैव कृष्णसत्कथा
मया सदैव गीयतां तथा कृपा विधीयताम् ।।

# अच्युताष्टकम्

अच्युतं केशवं राम-नारायणं कृष्ण-दामोदरं वासुदेवं हरिम् ।
श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचन्द्रं भजे ॥१ ॥

अच्युतं केशवं सत्यभामाधवं माधवं श्रीधरं राधिकाराधितं ।
इन्दिरामन्दिरं चेतसा सुन्दरं देवकी नन्दनं नन्दजं सन्दधे ॥२ ॥

विष्णवे जिष्णवे शङ्खिने चक्रिणे रुक्मिणि - रागिणे जानकी - जानये ।
वल्लवीवल्लभायार्चितायात्मने कंसविध्वंसिने वंशिने ते नमः ॥३ ॥

कृष्ण गोविन्द हे रामानारायण श्रीपते वासुदेवाजित श्रीनिधे ।
अच्युतानन्त हे माधवाधोक्षज द्वारकानायक द्रौपदीरक्षक ॥४ ॥

राक्षसक्षोभितः सीतया शोभितो दण्डकारण्यभूपुण्यताकारणः ।
लक्ष्मणेनान्वितो वानरैः सेवितोअगस्त्यसम्पूजितो राघवः पातुमाम् ॥५ ॥

धेनुकारिष्टकोनिष्टकृद् द्वेषिणां केशिहा कंसहृद्वंशिकावादकः ।
पूतना कोपनः सूरजा खेलनो बालगोपालकः पातु मां सर्वदा ॥६ ॥

विद्युदुद्योतवान्प्रस्फरद्वाससं प्रावृडम्भोदवत्-प्रोल्लसद्विग्रहम् ।
वन्यया मालया शोभितोरःस्थलं लोहितांघ्रिद्वयं वारिजाक्षं भजे ॥७ ॥

कुञ्चितैःकुन्तलैर्भ्राजमानाननं रत्नमौलिलसत्कुण्डलं गण्डयो : ।
हार-केयूरकं कङ्कणप्रोज्ज्वलं किङ्किणीमंजुलं श्यामलं तं भजे ॥८ ॥

अच्युतस्याष्टकं यः पठेदिष्टदं प्रेमतः प्रत्यहं पूरषः सस्पृहम् ।
वृत्ततः सुन्दरं कर्तृ विश्वम्भरं तस्य वश्यो हरिर्जायते सत्त्वरम् ॥९ ॥

इति श्रीशंकराचार्य विरचितम् स्तोत्रं संपूर्णम्

# चर्पटपञ्जरिकास्तोत्रम्

भज गोविन्दं भज गोविन्दं भज गोविन्दं मूढमते ।
प्राप्ते सन्निहिते सति मरणे नहि नहि रक्षति डुकृञ्करणे ॥

अग्रे वह्निः पृष्ठे भानू रात्रौ चुबुकसमर्पितजानु ।
करतलभिक्षा तरु-तल-वासस्तदपि न मुञ्चत्याशापाशः ॥१ ॥

दिनमपि रजनी-सायं-प्रातः शिशिर-वसन्तौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुस्तदपि न मुञ्चत्याशावायुः ॥२ ॥

पुनरपि जननं पुनरपि मरणं पुनरपि जननी जठरे शयनम् ।
इह संसारे भवदुस्तारे कृपया पारे पाहि मुरारे ॥३ ॥

बालस्तावत्क्रीडासक्तस्तरुणस्तावत्तरुणीरक्तः ।
वृद्धस्तावच्चिन्तामग्नः परेब्रह्मणि कोपि न लग्नः ॥४ ॥

वयसि गते कः कामविकारः शुष्के नीरे कः कासारः ।
नष्टे द्रव्ये कः परिवारो ज्ञाते तत्त्वे कः संसारः ॥५ ॥

यावज्जीवो निवसति देहे कुशलं तावत्पृच्छति गेहे ।
गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन्काये ॥६ ॥

गेयं गीतानामसहस्त्रं ध्येयं श्रीपतिरूपमजस्त्रम् ।
नेयं सज्जन सङ्गे चित्तं देयं दीनजनाय च वित्तम् ॥७ ॥

भगवद्गीता किञ्चिदधीता गङ्गाजललवकणिका पीता ।
सकृदपि यस्य मुरारिसमर्चा तस्य यमः किं कुरुते चर्चाम् ॥८ ॥

कस्त्वं कोहं कुत आयातः का मे जननी को मे तातः ।
इति परिभावय सर्वमसारं विश्वं त्यक्त्वा स्वप्नविचारम् ॥९ ॥

कुरुते गंगासागरमनं व्रतपरिपालनमथवा दानम् ।
ज्ञानविहीने सर्वमनेन मुक्तिर्न भवति जन्मशतेन ॥१० ॥

इति श्रीशंकराचार्य विरचितं चर्पटपंजरिका स्तोत्रम् संक्षिप्तम्

# श्रीरामस्तोत्रम्

आत्माधारं स्वतन्त्रं च सर्वशक्तिं विचिन्त्य च ।
चिन्तयेच्चेतसा नित्यं श्री रामः शरणं मम ॥१

नित्यात्मगुणसंयुक्तो नित्यात्मतनुमण्डितः ।
नित्यात्मकेलिनिरतः श्रीरामः शरणं मम ॥२

नित्यं मुक्तजनैर्जुष्टो निविष्टः परमे पदे ।
पदं परमभक्तानां श्रीरामः शरणं मम ॥३

योऽसौ सर्वतनुः सर्वः सर्वनामा सनातनः ।
आस्थितः सर्वभावेषु श्रीरामः शरणं मम ॥४ ॥

बहिर्मत्स्यादिरूपेण सद्धर्ममनुपालयन् ।
परिपाति जनान्दीनान् श्रीरामः शरणं मम् ॥५ ॥

अर्चावताररूपेण दर्शनस्पर्शनादिभिः ।
दीनानुद्धरते योऽसौ श्रीरामः शरणं मम ॥६ ॥

कौसल्याशुक्तिसंजातो जानकीकण्ठभूषणः ।
मुक्ताफलसमो योऽसौ श्री रामः शरणं मम ॥७ ॥

विश्वामित्रमखत्राता ताडकागतिदायक : ।
अहल्याशापशमनः श्रीरामः शरणं मम ॥८ ॥

पिनाकभञ्जनः श्रीमान् जानकीप्रेमदायकः ।
जामदग्न्यप्रतापघ्नः श्रीरामः शरणं मम ॥९ ॥

राज्याभिषेकसंहृष्टः कैकेयीवचनात्पुनः ।
पित्रा दत्तवनक्रीडः श्रीरामः शरणं मम ॥१० ॥

जटाचीरधरो धन्वी जानकीलक्ष्मणान्वितः ।
चित्रकूटकृतावासः श्रीरामः शरणं मम ॥११ ॥

महापञ्चवटीलीलासंजातपरमोत्सवः ।
दण्डकारण्यसंचारी श्रीरामः शरणं मम ॥१२॥

खरदूषणविच्छेदी दुष्टराक्षसभञ्जनः ।
हृतशूर्पणखाशोभः श्रीरामः शरणं मम ॥१३॥

मायामृगविभेत्ता च हृतसीतानुतापकृत् ।
जानकीविरहाक्रोशी श्रीरामः शरणं मम ॥१४॥

लक्ष्मणानुचरो धन्वी लोकयात्राविडम्बकृत् ।
पम्पातीरकृतान्वेषः श्रीरामः शरणं मम ॥१५॥

जटायुगतिदाता च कबन्धगतिदायकः ।
हनुमत्कृतसाहित्यः श्रीरामः शरणं मम ॥१६॥

सुग्रीवराज्यदः श्रीशो वालिनिग्रहकारकः ।
अङ्गदाश्वासनकरः श्रीरामः शरणं मम ॥१७॥

सीतान्वेषणनिर्मुक्तहनुमत्प्रमुखव्रजः ।
वेलानिवेशितबलः श्रीरामः शरणं मम ॥१८॥

हेलोत्तरितपाथोधिर्बलनिर्धूत राक्षसः ।
लङ्कादाहकरो धीरः श्रीरामः शरणं मम ॥१९॥

रोषसंबद्धपाथोधिर्लङ्का प्रासादरोधकः ।
रावणादिप्रभेत्ता च श्रीरामः शरणं मम ॥२०॥

जानकीजीवनत्राता विभीषणसमृद्धिदः ।
पुष्पकारोहणासक्तः श्रीरामः शरणं मम ॥२१॥

राज्यसिंहासनारुढः कौसल्यानन्दवर्धनः ।
नामनिर्धूतनिरयः श्रीरामः शरणं मम ॥२२॥

यज्ञकर्ता यज्ञभोक्ता यज्ञभर्ता महेश्वरः ।
अयोध्यामुक्तिदः शास्ता श्रीरामः शरणं मम ॥२३॥

# रामरक्षास्तोत्रम्

अतसीपुष्पसङ्काशं पीतवाससमच्युतम् ।
ध्यात्वा वै पुण्डरीकाक्षं रामरक्षां पठेत् बुधः ॥१ ॥

पातु मे हृदयं रामः श्रीकण्ठः कण्ठमेव च ।
नाभिं पातु मखत्राता कटिं मे विश्वरक्षकः ॥२ ॥

करौ पातु दाशरथिः पादौ मे विश्वरूपधृक् ।
चक्षुषी पातु वै देवः सीतापतिरनुत्तमः ॥३ ॥

शिखां मे पातु विश्वात्मा कर्णौ मे पातु कामदः ।
पार्श्वयोस्तु सुरत्राता कालकोटिदुरासदः ॥४ ॥

अनन्तः सर्वदा पातु शरीरं विश्वनायकः ।
जिह्वा मे पातु पापघ्नो लोकशिक्षाप्रवर्तकः ॥५ ॥

राघवः पातु मे दन्तान् केशान् रक्षतु केशवः ।
सक्थिनी पातु मे दैत्यविजयो नाम विश्वसृक् ॥६ ॥

एतां रामबलोपेतां रक्षां यो वै पुमान् पठेत् ।
स चिरायुः सुखी विद्वान् लभते दिव्यसम्पदम् ॥७ ॥


विविधदेवतास्तोत्राणि

# गणेशकवचम्

ध्यायेत्सिंहगतं विनायकममुं दिग्बाहुमाद्ये युगे
त्रेतायां मयूरवाहनममुं षड्ष्यहुकं सिद्धिदम् ।
द्वापारे तु गजाननं युगभुजं रक्ताङ्गरागं विभुं
तुर्ये तु द्विभुजं सिताङ्गरुचिरं सर्वार्थदं सर्वदा ॥१ ॥

विनायकः शिखां पातु परमात्मा परात्परः ।
अतिसुन्दरकायस्तु मस्तकं सुमहोत्कटः ॥२ ॥

ललाटं कश्यपः पातु भ्रूयुगं तु महोदरः ।
नयने भालचन्द्रस्तु गजास्यस्त्वोष्ठपल्लवौ ॥३ ॥

जिह्वां पातु गणक्रीडश्चिबुकं गिरिजासुतः ।
वाचं विनायकः पातु दन्तान् रक्षतु दुर्मुखः ॥४ ॥

श्रवणौ पाशपाणिस्तु नासिकां चिन्तितार्थद : ।
गणेशस्तु मुखं कण्ठं पातु देवो गणंजयः ॥५ ॥

स्कन्धौ पातु गजस्कन्धः स्तनौ विघ्नविनाशनः ।
हृदयं गणनाथस्तु हेरम्बो जठरं महान् ॥६ ॥

धराधरः पातु पार्श्वौ पृष्ठं विघ्नहरः शुभः ।
लिङ्गं गुह्यं सदा पातु वक्रतुण्डो महाबलः ॥७ ॥

गणक्रिडो जानुजङ्घे ऊरु मङ्गलमूर्तिमान् ।
एकदन्तो महाबुधिः पादौ गुल्फौ सदाऽवतु ॥८ ॥

क्षिप्रप्रसादनो बाहू पाणी आशाप्रपूरकः ।
अङ्गुलीश्च नखान्पातु पद्महस्तोऽरिनाशनः ॥९ ॥

सर्वाङ्गानि मयूरेशो विश्वव्यापी सदाऽवतु ।
अनुक्तमपि यत्स्थानं धूम्रकेतुः सदाऽवतु ॥१० ॥

आमोदस्त्वग्रतः पातु प्रमोदः पृष्ठतोऽवतु ।
प्राच्यां रक्षतु बुद्धीश आग्नेय्यां सिद्धिदायकः ॥११ ॥

दक्षिणस्यामुमापुत्रो नैऋत्यां तु गणेश्वरः ।
प्रतीच्यां विघ्नहर्ताऽव्याद् वायव्यां गजकर्णकः ॥१२ ॥

कौबेर्यां निधिपः पायाद् ईशान्यामीशनन्दनः ।
दिवाऽव्यादेकदन्तस्तु रात्रौ संध्यासु विघ्नहृत् ॥१३ ॥

राक्षसासुरवेताल-ग्रहभूतपिशाचतः ।
पाशाशधरः पातु रजः सत्त्वतमः मृतिः ॥१४ ॥

ज्ञानं धर्मं च लक्ष्मीं च लज्जां कीर्तिं तथा कुलं ।
वपुर्धनं च धान्यं च गृहदारान्सुतान् सखीन् ॥१५ ॥

सर्वायुधधरः पौत्रान् मयूरेशोऽवतात्सदा ।
कपिलोऽजाविकं पातु गजाश्वान्विकटोऽवतु ॥१६ ॥

भूर्जपत्रे लिखित्वेदं यः कण्ठे धारयेत्सदा ।
न भयं जायते तस्य यक्षरक्षःपिशाचतः ॥१७ ॥

त्रिसंध्यं जपते यस्तु वज्रसारतनुर्भवेत् ।
यात्राकाले पठेद्यस्तु निर्विघ्नेन फलं लभेत् ॥१८ ॥

# श्री गणेशपञ्चरत्नम्

मुदा करात्तमोदकं सदा विमुक्तिसाधकं
कलाधरावतंसकं विलासि-लोकरक्षकम् ।
अनायकैकनायकं विनाशितेभ-दैत्यकं
नताशुभाशुनाशकं नमामि तं विनायकम् ॥१ ॥

नतेतराति-भीकरं नवोदितार्कभास्वरं
नमत् सुरारिनिर्जरं नताधिकापदुद्धरम् ।
सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरं
महेश्वरं तमाश्रये परात्परं निरन्तरम् ॥२ ॥

समस्तलोकशङ्करं निरस्तदैत्यकुञ्जरं
दरेतरोदरं वरं वरेभवक्त्रमक्षरम् ।
कृपाकरं क्षमाकरं मुदाकरं यशस्करं
मनस्करं नमस्कृतां नमस्करोमि भास्वरम् ॥३ ॥

अकिञ्चनार्तिमार्जनं चिरन्तनोक्तिभाजनं
पुरारिपूर्वनन्दनं सुरारिगर्वचर्वणम् ।
प्रपञ्चनाशभीषणं धनञ्जयादिभूषणं
कपोलदानवारणं भजे पुरुणवारणमू ॥४ ॥

नितान्तकान्तदन्तकान्ति-मन्तकान्तकात्मज-
मचिन्त्यरुप-मन्तहीन-मन्तराय-कृन्तनम् ।
हृदन्तरे निरन्तरं वसन्तमेवयोगिनां
तमेकदन्तमेव तं विचिन्तयामि सन्ततम् ॥५ ॥

महागणेश-पञ्चरत्न-मादरेण योन्वहं
प्रजल्पति प्रभातके हृदिस्मरन् गणेश्वरम् ।
अरोगता-मदोषतां सुसाहितीं सुपुत्रतां
समाहितायुरष्टभूति-मभ्युपैति सोचिरात् ॥६ ॥

# श्री गणेशलीलास्तवम्

ओङ्कारमाद्यं प्रवदन्ति सन्तो वाचः श्रुतीनामपि यं गिरन्ति ।
गजाननं देवगणानतांघ्रिं भजेहमर्धेन्दुकृतावतंसम् ॥

पादरविन्दार्चनतत्पराणां संसारदावानलभङ्गदक्षम् ।
निरन्तरं निर्गतदानतोयैः तं नौमि विघ्नेश्वरमम्बुदाभम् ॥

निवारयन्तं निजकर्णजालैः मत्तालिजालं मदपङ्कमग्नम् ।
कृताङ्गरागं नवकुंकुमेन को विस्मरेत् पुत्रमनङ्गशत्रोः ॥

शम्भोर्जटाजूटनिवासिगङ्गा-जलं समानीय कराम्बुजेन ।
लीलाभिराराच्छिवमर्चयन्तं गजाननं भक्तियुता भजन्ति ॥

शम्भोः समालोक्य जटाकलापे शशाङ्कखण्डं निजपुष्करेण ।
स्वभग्नदन्तं प्रविचिन्त्य मौग्ध्या-दाक्रष्टुकामः श्रियमातनोतु ॥

येनार्पितं सत्यवतीसुताय पुराणमालिख्य विषाणकोट्या ।
तं चन्द्रमौलेस्तनयं तपोभि-राराध्यमानन्दघनं भजामि ॥

पदं-श्रुतीनामपदं-स्तुतीनां लीलावतारं परमात्ममूर्तेः ।
नागात्मकं वा पुरुषात्मकं वा त्वभेदमाद्यं भजविघ्नराजम् ॥

पाशांकुशौ भग्नरदं त्वभीष्टं करैर्दधानं कररन्ध्रमुक्तैः ।
मुक्ताफलाभैः पृथुशीकरोघैः सिञ्चन्तमङ्गं शिवयोर्भजामि ॥

मदोल्लसत्पञ्चमुखैरजस्रं अध्यापयन्तं सकलागमार्थम् ।
देवान् ऋषीन् भक्तजनैकमित्रं हेरम्बमर्कारुणमाश्रयामि ॥

अनेकमेकं गजमेकदन्तं सोमेशसूनुं जगदादिबीजम् ।
ब्रह्मेति यं वेदविदोवदन्ति तं संविदाचार्यतनुं भजामि ॥

यज्ञैरनेकैर्बहुभिस्तपोभिः आराध्यमाद्यं गजराजवक्त्रम् ।
स्तुत्यानया ये विधिवत्स्तुवन्ति ते सर्वलक्ष्मीनिलयो भवन्ति ॥

# स्कन्द-स्तोत्रम्

ॐ नमः प्रणवार्थाय प्रणवार्थ विधायिने ।
प्रणवाक्षरबीजाय प्रणवाय नमो नमः ॥१ ॥

वेदान्तार्थस्वरूपाय वेदान्तार्थविधायिने
विदान्तार्थविदे नित्यं विदिताय नमो नमः ॥२ ॥

नमो गुहाय भूतानां गुहासुनिहिताय च ।
गुह्याय गुह्यरूपाय गुह्यागमविदे नमः ॥३ ॥

अणोरणीयसे तुभ्यं महतोऽपि महीयसे ।
नमः परावरज्ञाय परमात्मस्वरूपिणे ॥४ ॥

स्कन्दाय स्कन्दरूपाय मिहिरारुणतेजसे
नमो मन्दारमालोद्यन्मुकुटादिभृते सदा ॥५ ॥

शिवशिष्याय पुत्राय शिवस्य शिवदायिने ।
शिवप्रियाय शिवयोरानन्दनिधये नमः ॥६ ॥

गाङ्गेयाय नमस्तुभ्यं कार्तिकेयाय धीमते ।
उमापुत्राय महते शरकानन-शायिने ॥७ ॥

षडक्षरशरीराय षड्विधार्थविधायिने ।
षडध्वातीतरूपाय षण्मुखाय नमो नमः ॥८ ॥

द्वादशायतनेत्राय द्वादशोद्यतबाहवे ।
द्वादशायुधधाराय द्वादशात्मन् नमोऽस्तु ते ॥९ ॥

चतुर्भुजाय शान्ताय शक्तिकुक्कुट-धारिणे ।
वरदाभयहस्ताय नमोऽसुरविदारिणे ॥१० ॥

इति स्कन्दस्तवं दिव्यं वामदेवेन भाषितम् ।
यः पठेच्छृणुयाद्वापि स याति परमां गतिम् ॥११ ॥

महाप्रज्ञाकरं ह्येतच्छिवभक्तिविवर्धनम् ।
आयुरारोग्यधनकृत्-सर्वकामप्रदं सदा ॥१२ ॥

# नन्दिकेश स्तुति

नमज्जनाखिलाशुभाशुशुक्षणिं नगस्थितं
नगेन्द्रजापतिप्रियं नराशभंगविक्रमम् ।
नितान्तमीशसन्निधौ च भक्तवर्गसन्नुतं
नमामि नंदिकेश्वरं शिलादजं गणेश्वरम् ॥१ ॥

दिगीश्वरार्चितांघ्रि - पङ्कजंतमद्भुताकृतिं
नितान्तशम्भुनर्तनात्तमद्दलंवृषाननम् ।
दिवाकर क्षपेशवह्नि लोचन त्रयोज्वलं
नमामि नंदिकेश्वरं शिलादजं गणेश्वरम् ॥२ ॥

पुराहि जातु रक्षसामधीश्वरं स्वमाननं
हसन्तमीक्ष्य कोपतः शशाप यो वृषेश्वरः ।
तथैव विष्णुवाहनः प्रशिक्षितञ्च लीलया
नमामि नंदिकेश्वरं शिलादजं गणेश्वरम् ॥३ ॥

मुधा परोमुकुन्द एव सर्वदेवतास्विति
प्रजल्पयन्तमग्रतो मुनिं पराशरात्मजम् ।
क्रुधास्वकीयहुंकृते रशिक्षयच्च योगिराट्,
नमामि नंदिकेश्वरं शिलादजं गणेश्वरम् ॥४ ॥

मुहुर्मुहुर्जपन् वरं परं च रौद्रमादरात्
अवाप यो महेश्वराच्च नित्यनिर्विकल्पताम् ।
सुकेतुतां प्रवाहतां गणेशतां च साम्यतां
नमामि नन्दिकेश्वरं शिलादजंगणेश्वरम् ॥५ ॥

सुपंचरत्नमालिकां इमां पठन्ति ये नराः
सुपुत्रमित्रभृत्यधान्य सत्कलत्र सम्पदः ।
अरोगतां च योगसिद्धिमप्यहो यदीप्सितं
समृद्धिमप्ययाचितां भजन्ति वाग्विलासताम् ॥६ ॥

# आदित्यहृदयस्तोत्रम्

## विनियोग

ॐ अस्य श्री आदित्य हृदय स्तोत्रस्यागस्त्य ऋषिस्त्रिंशतोऽ नुष्टुप् छन्दः, एकस्य जगतीछन्दः, आदित्यो देवता, मम संकल्पिताभीष्ट-सिद्ध्यर्थे जपे विनियोगः ।

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥१ ॥

दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ।
उपगम्याऽब्रवीद् राममगस्त्यो भगवांस्तदा ॥२ ॥

राम ! राम ! महाबाहो ! श्रृणु गुह्यं सनातनम् ।
येन सर्वानरीन् वत्स !समरे विजयिष्यसे ॥३ ॥

आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् ।
जयावहं जपेन्नित्यमक्षयं परमं शिवम् ॥४ ॥

सर्वमङ्गल माङ्गल्यं सर्वपाप - प्रणाशनम् ।
चिन्ता - शोक - प्रशमनमायुर्वर्धनमुत्तमम् ॥५ ॥

रश्मिमन्तं समुद्यन्तं देवासुर - नमस्कृतम् ।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ॥६ ॥

सर्व देवात्मको ह्येष तेजस्वी रश्मिभावनः ।
एष देवाऽसुरगणाँल्लोकान् पातु गभस्तिभिः ॥७ ॥

एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः ।
महेन्द्रो धनदः कालो यमः सोमो ह्यपाम्पतिः ॥८ ॥

पितरो वसवः साध्या अश्विनौ मरुतो मनुः ।
वायुर्वह्निः प्रजा प्राणा ऋतुकर्ता प्रभाकरः ॥९ ॥

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ।
सुवर्णस्तपनो भानुः स्वर्णरेता दिवाकरः ॥१० ॥

हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् ।
तिमिरोन्मथनः शम्भुः स्त्वष्टा मार्तण्डकोंऽशुमान् ॥११ ॥

हिरण्यगर्भः शिशिरः तपनो भास्करो रविः ।
अग्निगर्भोऽदितेः पुत्रः शङ्खः शिशिरनाशनः ॥१२ ॥

व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः ।
घनवृष्टिरपां मित्रो विन्ध्यवीथीप्लवङ्गमः ॥१३ ॥

आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः ।
कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः ॥१४ ॥

नक्षत्र - ग्रह- ताराणामधिपो विश्वभावनः ।
तेजसामपि तेजस्वी द्वादशात्मन् ! नमोऽस्तुते ॥१५ ॥

नमः पूर्वाय गिरये पश्चिामायाऽद्रये नमः ।
ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥१६ ॥

जयाय जयभद्राय हर्यश्वाय नमो नमः ।
नमो नमः सहस्रांशो आदित्याय नमो नमः ॥१७ ॥

नम उग्राय वीराय सारङ्गाय नमो नमः ।
नमः पद्मप्रबोधाय प्रचण्डाय नमोऽस्तु ते ॥१८ ॥

ब्रह्मेशानाच्युतेशाय सूरायादित्यवर्चसे ।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥१९ ॥

तमोघ्नाय हिमघ्नाय शत्रुघ्नायाऽमितात्मने ।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥२० ॥

तप्तचामीकराभाय हरये विश्वकर्मणे ।
नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे ॥२१ ॥

नाशयत्येष वै भूतं तदेव सृजति प्रभुः ।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥२२ ॥

एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ।
एष चैवाऽग्निहोत्रं च फलं चैवाऽग्निहोत्रृणाम् ॥२३ ॥

देवाश्च क्रतवश्चैव क्रतूनां फलमेव च ।
यानि कृत्यानि लोकेषु सर्वेषु परमप्रभुः ॥२४ ॥

एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च ।
कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव ॥२५ ॥

पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ।
एतत् त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ॥२६ ॥

अस्मिन्क्षणे महाबाहो ! रावणं त्वं जयिष्यसि ।
एवमुक्त्वा ततोऽगस्त्यो जगाम स यथागतम् ॥२७ ॥

एतत् श्रुत्वा महातेजा नष्टशोकोऽभवत्तदा ।
धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥२८ ॥

आदित्यं प्रेक्ष्य जप्त्वेदं परं हर्षमवाप्तवान् ।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥२९ ॥

रावणं प्रेक्ष्य हृष्टात्मा युद्धार्थं समुपागतम् ।
सर्वयत्नेन महता वधे तस्य धृतोऽभवत् ॥३० ॥

अथ रविरवदन्निरीक्ष्य रामं
मुदितमनाः परमं प्रहृष्यमाणः ।
निशिचरपतिसंक्षयं विदित्वा
सुरगणमध्यगतो वचस्त्वरेति ॥३१ ॥

# सूर्यस्तोत्रम्

नमो नमः सहस्रांशो ह्यदित्याय नमो नमः ।
नमः पद्मप्रबोधाय नमस्ते द्वादशात्मने ॥१ ॥

नमो विश्वप्रबोधाय नमो भ्राजिष्णु जिष्णवे ।
ज्योतिषे च नमस्तुभ्यं ज्ञानार्काय नमो नमः ॥२ ॥

प्रदीप्ताय प्रगल्भाय युगान्ताय नमो नमः ।
नमस्ते होतृपतये पृथिवीपतये नमः ॥३ ॥

नमोंकार वषट्कार सर्वयज्ञ नमोस्तुते ।
ऋग्वेदाय यजुर्वेद सामवेद नमोस्तुते ॥४ ॥

नमो हाटकवर्णाय भास्कराय नमो नमः ।
जयाय जयभद्राय हरिदश्वाय ते नमः ॥५ ॥

दिव्याय दिव्यरुपाय ग्रहाणां पतये नमः ।
नमस्ते शुचये नित्यं नमः कुरुकुलात्मने ॥६ ॥

नमस्त्रैलोक्यनाथाय भूतानां पतये नमः ।
नमः कैवल्यनाथाय नमस्ते दिव्यचक्षुषे ॥७ ॥

त्वं गतिस्त्वं द्युतिर्ब्रह्मा त्वं विष्णुस्त्वं प्रजापतिः ।
त्वमेव रुद्रः परमात्मा वायुरग्निस्त्वमेव च ॥८ ॥

योजनानां सहस्त्रे द्वे शते द्वे द्वे च योजने ।
एकेन निमिषार्धेन क्रममाण नमोस्तुते ॥९ ॥

नमो वेदान्तवेद्याय सर्वकर्मादिसाक्षिणे ।
नमो भगवते तुभ्यं आदित्याय नमो नमः ॥१० ॥

# पञ्चदेवस्तोत्रम्

गणेश-विष्णु-सूर्येश-दुर्गाख्यं देवपंचकम् ।
वन्दे विशुद्धमनसा जनसायुज्यदायकम् ॥१ ॥

ब्रह्मरूपान् भिन्नमूर्तीन् पंचदेवान् मुनिस्तुतान् ।
वन्दे विशुद्धभावेनेशाम्बेनैकरदाच्युतान् ॥२ ॥

कल्याणदायिनो देवान् कलौ मुक्तिप्रदायकान् ।
विष्णुशंभुशिवासूर्य-गणेशाख्यान् नमाम्यहम् ॥३ ॥

एकात्मानो भिन्नरूपान् लोकरक्षणतत्परान् ।
शिवविष्णुशिवासूर्य-हेरम्बान् प्रणमाम्यहम् ॥४ ॥

पंचभूतान् पंचकृत्यान् पंचपातकनाशकान् ।
शिवाशंकर-हेरम्ब-विष्णुसूर्यान् नमाम्यहम् ॥५ ॥

नित्यानन्दसन्दोह - दायिनो दीनपालकान् ।
शिवाच्युतगणेशेन-दुर्गाख्यान् नौम्यहं गुरून् ॥६ ॥

कमनीयतनून् देवान् सेवावश्यान् कृपावयः ।
शंकरेनशिवाविष्णुगणेशाख्यान् नमाम्यहम् ॥७ ॥

सूर्यविष्णुशिवाशंभु-विघ्नराजाभिधान् सुरान् ।
संविद्रूपान् सदा वन्दे सुखसंदोहसिद्धये ॥८ ॥

हरौ हरे तीक्ष्णकरे गणेशे
शक्तौ न भेदो जगदादिहेतुषु ।
अधः पतन्त्येषु भिदां दधाना
भाषन्त एवं यतयोच्युताश्रमाः ॥९ ॥

# श्रीहनुमदष्टकस्तोत्रम्

श्रीरघुराज-पदाब्ज-निकेतन ! पङ्कजलोचन ! मङ्गलराशे !
चण्डमहाभुज-दण्डसुरारि-विखण्डनपण्डित !पाहि दयालो !
पातकिनं च समुद्धर मां महतां हि सतामपि मानमुदारं
त्वां भजतो मम देहि दयाघन ! हे हनुमत् ! स्वपदाम्बुजदास्यम् ॥१ ॥

संसृतिताप-महानलदग्ध-तनूरुहमर्म-तनोरतिवेलं
पुत्र-धन-स्वजनात्म-गृहादिषु सक्तमतेरतिकिल्बिषमूर्तेः ।
केनचिदप्यमलेन पुराकृत-पुण्य-सुपुञ्जलवेन विभो वै
त्वां भजतो मम देहि दयाघन ! हे हनूमत् ! स्वपदाम्बुजदास्यम् ॥२ ॥

संसृतिकूप-मनल्पमघोरनिदाघ-निदानमजस्रमशेषं
प्राप्य सुदुःख-सहस्रभुजङ्ग विषैकसमाकुल-सर्वतनोर्मे ।
घोरमहाकृपणापदमेव गतस्य हरे पतितस्य भवाब्धौ
त्वां भजतो मम देहि दयाघन ! हे हनुमत् ! स्वपदाम्बुजदास्यम् ॥३ ॥

संसृतिसिन्धु-विशाल-कराल-महाबलकाल-झषग्रसनार्तं
व्यग्र-समग्रधियं कृपणं च महामद- नक्र-सुचक्र-हृतासुम् ।
काल-महारसनोर्मि-निपीडितमुद्धर-दीनमनन्यगतिं मां
त्वां भजतो मम देहि दयाघन ! हे हनुमत् ! स्वपदाम्बुजदास्यम् ॥४ ॥

संसृतिघोर-महागहनेचरतो मणिरञ्जित-पुण्य-सुमुर्तेः
मन्मथभीकर-घोरमहोग्र-मृगप्रवरार्दित- गात्रसुसन्धेः ।
मत्सरताप-विशेषनिपीडितबाह्यमतेश्च कथञ्चिदमेयं
त्वां भजतो मम देहि दयाघन ! हे हनुमत् ! स्वपदाम्बुजदास्यम् ॥५ ॥

संसृतिवृक्ष-मनेकशताघ-निदानमनन्त-विकर्मसुशाखं
दु:खफलं करणादिपलाशमनङ्ग-सुपुष्पमचिन्त्य-सुमूलम् ।
तं ह्यधिरुह्य हरे पतितं शरणागतमेव विमोचय मूढं
त्वां भजतो मम देहि दयाघन ! हे हनुमत् ! स्वपदाम्बुजदास्यम् ॥६ ॥

संसृतिपन्नग-वक्रभयंकरद्रंष्ट्र-महाविषदग्ध-शरीरं
प्राणविनिर्गम-भीतिसमाकुलमन्धमनाथमतीव विषण्णम् ।
मोहमहाकुहरे पतितं दययोद्धर मामजितेन्द्रियकामं
त्वां भजतो मम देहि दयाघन ! हे हनुमत् ! स्वपदाम्बुजदास्यम् ॥७ ॥

इन्द्रियनामक-चौरगणैर्हृत-तत्त्वविवेक-महाधनराशिं
संसृतिजाल-निपातितमेव महाबलिभिश्च विखण्डितकायम् ।
त्वत्पद पद्म-मनुत्तममाश्रितमाशु कपीश्वर ! पाहि कृपालो !
त्वां भजतो मम देहि दयाघन ! हे हनुमत् ! स्वपदाम्बुजदास्यम् ॥८ ॥

ब्रह्म-मरुद्गण-रुद्र-महेन्द्र-किरीट-सुकोटि-लसत्पदपीठं
दाशरथिं जयति क्षितिमण्डल एष निधाय सदैव हृदब्जे ।
तस्य हनूमत एव शिवङ्कर-मष्टकमेतदनिष्टहरं वै
य: सततं हि पठेत् स नरो लभतेच्युत-रामपदाब्ज-निवासम् ॥९ ॥

# श्रीमद् भगवद्गीता अष्टोत्तरशतनामस्तोत्रम्

ॐ गीता गोविन्दहृद्गंगा गुरुगेया गिरामृता ।
गायत्री गोपिता गूढा गुडाकेशार्तिहारिणी ॥१ ॥

मधुसूदनमुखांभोजसुधा सर्वार्थमंजरी ।
महाभारत-मध्यस्था मुकुन्दघनदामिनी ॥२ ॥

हरिझंकृतचिद्वीणा त्रिषट्तन्त्रीवरस्वरा ।
प्रस्थानप्रमुखा प्रत्यग्दीपिका प्रणवात्मिका ॥३ ॥

प्रपत्त्यंकुरिता सीता सत्या कृष्णाब्जशारदा ।
कृष्णापतिसमुद्धर्त्री कार्पण्याधिमहौषधी ॥४ ॥

अम्बा चिन्त्यपदा मात्रा चिन्मात्रा नन्दवर्षिणी ।
अष्टादशभुजा दुर्गाऽध्यात्मशस्त्रास्त्रधारिणी ॥५ ॥

वरदाऽभयदा ज्ञानमुद्रा मन्त्राक्षमालिका ।
वेणुगानरता शूल-शंख-चक्र-गदा-धरा ॥६ ॥

विद्याकुंभोल्लसत्पाणि: बाणकोदण्डमण्डिता ।
करताललयोपेता पद्मपाशांकुशच्छवि: ॥७ ॥

अनुष्टुप्संकुला नानाछन्दालंकारसुन्दरी ।
इन्द्रोपेन्द्रसंवलिता चोपजातिसुसज्जिता ॥८ ॥

विपरीतवृत्तियुक्ता वर्णमंगलविग्रहा ।
व्यासप्रिया व्यसनहा वासुदेवप्रसादजा ॥९ ॥

विषादघ्नी विरागिणी विद्या व्यामोहनाशिनी ।
विनेयवत्सला श्रेया निश्चितार्थ-प्रकाशिनी ॥१० ॥

देहीदेहविवेकाढ्या बुद्धिद्वयविलासिनी ।
निर्द्वन्द्वा नित्य सत्त्वस्था निःस्पृहा संशयापहा ॥११ ॥

ब्राह्मीस्थितिः स्थितप्रज्ञा ब्रह्मस्पर्शसुखास्पदा ।
ब्रह्मयोनिर्यज्ञमयी ब्रह्मनिर्वाणदायिनी ॥१२ ॥

कर्मान्ता कामहा काम्या सौम्या योगत्रयाश्रया ।
धर्मक्षेत्रोद्भवा धर्म्या ध्यानस्था भक्ति निर्झरी ॥१३ ॥

ज्ञानविज्ञानसोपाना दिव्यस्मरणसन्ततिः ।
राजविद्या राजगुह्या प्रत्यक्षा सुलभागतिः ॥१४ ॥

विभूतिभूषितानन्ता विश्वरूपप्रदर्शिनी ।
अद्वेष्टृत्वादिसंदोहा क्षेत्रक्षेत्रज्ञपालिनी ॥१५ ॥

गुणज्ञा त्रिगुणातीता क्षराक्षरविमर्शिनी ।
पुरुषोत्तमपरा पूर्णा कृतकृत्यपदप्रदा ॥१६ ॥

दिव्यसंपत्प्रसूर्दिव्या शरणागतिधर्मिणी ।
संन्यासरसिका मुक्ता सर्वपापप्रमोचिनी ॥१७ ॥

श्रीशंकरादृताऽद्वैता श्रीनिवासनिवासभूः ।
सर्वशास्त्रमयी संवित् स्मृतिः समरसाकृतिः ॥१८ ॥

योगेश्वरानन्दकरीं गीतां भगवतीं सदा ।
ये स्तुवन्त्यनया भक्त्या यान्ति परमागतिम् ॥१९ ॥

# भारती - मंगल - स्तोत्रम्

ऋषीणां दीक्षया दृष्ट्या राष्ट्रीकृत-वसुन्धरा ।
ऋतंभरा तद्भारती संमृद्धा मंगलास्तु नः ॥१ ॥

हिमवान् मूर्ध्नि कोटीरः सागरं पादनूपुरम् ।
गंगाभरण-भारती संमृद्धा मंगलास्तु नः ॥२ ॥

नारायणसखाः नराः नार्यो लक्ष्मीविभूतयः ।
गेहे गेहे तद्भारती संमृद्धा.. .... ॥ ३ ॥

अर्जुनप्रभृतिवीर-प्रसूर्राजर्षिशासिता ।
विश्वबन्धुत्वभारती संमृद्धा...... ॥४ ॥

यत्र ब्रह्माण्डनाथोपि मुदा बालायते मुहु : ।
भक्तिप्रभाव-भारती संमृद्धा..... ॥५ ॥

विश्वमानवशासनं गीताख्यं यत्र घोषितम् ।
धर्मक्षेत्रात्मभारती संमृद्धा.... ॥६ ॥

व्यासव्यवस्थिता मध्ये शंकाराचार्यसेविता ।
प्रस्थानत्रयभारती संमृद्धा..... ॥७ ॥

वसिष्ठादि-विवेकान्त-महापुरुष-पूजिता ।
वेदान्तप्राणभारती संमृद्धा.... ॥८ ॥

अश्वक्रान्ता रथक्रान्ता विष्णुक्रान्तापि भारती ।
गुरोः संवित्पदाक्रान्ता संमृद्धा मंगलास्तु नः ॥९ ॥

# भारत तीर्थ स्मरणम्

स्मरामि शतद्रुं सिन्धुं चन्द्रभागां सरस्वतीम् ।
विपाशां यमुनां गगां उत्तरस्थान् सुरापगान् ॥१

नमामि शारदां शोणां कौशिकीं गण्डकीं तथा ।
सरयूं गोमतीं पूर्वे ब्रह्मपुत्रां महानदीम् ॥२

मध्ये चर्मण्वतीं क्षिप्रां सेवे वेत्रवतीं महीम् ।
शरावतीं च पश्चिमे नर्मदां तपतीं श्रये ॥३

याम्ये गोदावरीं कृष्णां कावेरीं ताम्रपर्णिकाम् ।
तुंगभद्रां भजे पूर्णां शंकराचार्यपूजिताम् ॥४

सायं प्रातः स्मरेन्नित्यं सादरं चित्तशुद्धये ।
भारतोद्धाराकान् तीर्थान् संवित् स्फूर्तिप्रदायकान् ॥५

# गंगाष्टकम्

भगवति तव तीरे नीरमात्राशनोऽहं

विगतविषयतृष्णः कृष्णमाराधयामि ।

सकलकलुषु-भङ्गे स्वर्ग सोपानसंगे

तरल तरतरंगे देवि गंगे प्रसीद ॥१ ॥

भगवति ! भवलीला मौलिमाले ! तवाम्भः

कणमणुपरिमाणां प्राणिनो ये स्पृशन्ति ।

अमरनगरनारी चामरग्राहणीनां

विगतकलिकलङ्कातङ्कमङ्के लुठन्ति ॥२ ॥

ब्रह्माण्डं खण्डयन्ती हर शिरसि जटा वल्लिमुल्लासयन्ती
स्वर्ल्लोकादापतन्ती कनकगिरिगुहागण्डशैलात्स्खलन्ती ।
क्षोणीपृष्टे लुठन्ती दुरितचयचमूर्निर्भरं भर्त्सयन्ती
पाथोधिं पूरयन्ती सुरनगर सरित्पावनी नः पुनातु ॥३ ॥

मज्जन्मातंग कुम्भच्युतमदमदिरामोदमत्तालिजालं
स्नानैः सिद्धांगन्गानां कुचयुगविगलत्कुंकुमासंगपिंगम् ।
सायं प्रातर्मुनीनां कुशकुसुमचयैः छन्नतीरस्थनीरं
पायान्नो गांगमम्भः करिकलभकराक्रांन्तरं हस्तरंगम् ॥४ ॥

आदावादिपितामहस्य नियमव्यापारपात्रे जलं
पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम् ।
भूयः- शम्भुजटाविभूषणमणिर्जह्नोर्महर्षेरियं
कन्या कल्मषनाशिनी भगवती भागीरथी पातु माम् ॥५ ॥

शैलेन्द्रादवतारिणी निजजले मज्जज्जनोत्तारिणी
पारावारविहारिणी भवभय - श्रेणी - समुत्सारिणी ।
शेषाहेरनुकारिणी हरशिरोवल्लीदलाकारिणी
काशीप्रान्तविहारिणी विजयते गंगा मनोहारिणी ॥६ ॥

कुतो वीचिर्वीचिस्तव यदि गता लोचनपथं
त्वमापीता पीताम्बरपुरनिवासं वितरसि ।
त्वदुत्संगे गंगे पतति यदि कायस्तनुभृतां
तदा मातः शातक्रतवपदलाभोप्यतिलघुः ॥७ ॥

गंगे त्रैलोक्य सारे सकल सुरवधूधौतविस्तीर्ण तोये
पूर्णब्रह्मस्वरुपे ! हरिचरणजो हारिणि स्वर्गमार्गे ।
प्रायश्चित्तं यदि स्यात् तव जलकणिकाब्रह्महत्यादिपापे
कस्त्वां स्तोतुं समर्थः त्रिजगदघहरे ! देवि गंगे प्रसीद ॥८ ॥

मातर्जाह्नवि ! शंभुसंगमिलिते ! मौलौ निधायान्जलिं ।
त्वत्तीरे वपुषोऽवसानसमये नारायणांघ्रिद्वयम् ।
सानन्दं स्मरतो भविष्यति मम प्राणप्रयाणोत्सवे,
भूयाद्भक्तिरविच्युता हरिहराद्वैतात्मिका शाश्वती ॥९ ॥

गंगाष्टकमिदं पुण्यं यः पठेत् प्रयतो नरः,
सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥१० ॥

इति श्रीशंकराचार्यविरचितं स्तोत्रं संपूर्णम्

# गंगास्तोत्रम्

देवि सुरेश्वरि भगवति गंगे त्रिभुवनतारिणि तरलतरंगे ।
शंकरमौलिविहारिणि विमले मम मतिरास्तां तव पदकमले ॥१ ॥

भागीरथि सुखदायिनि मातस्तव जलमहिमा निगमे ख्यातः ।
नाहं जाने तव महिमानं पाहि कृपामयि मामज्ञानम् ॥२ ॥

हरिपदपाद्यतरंगिणि गंगे हिमविधुमुक्ताधवलतरंगे ।
दूरीकुरु मम दुष्कृतिभारं कुरु कृपया भवसागरपारम् ॥३ ॥

तव जलममलं येन निपीतं परमपदं खलु तेन गृहीतम् ।
मातर्गंगे त्वयि यो भक्तः किल तं द्रष्टुं न यमः शक्तः ॥४ ॥

पतितोद्धारिणि जाह्नवी गंगे खण्डितगिरिवरमण्डितभंगे ।
भीष्मजननि हे मुनिवरकन्ये पतितनिवारिणि त्रिभुवनधन्ये ॥५ ॥

कल्पलतामिव फलदा लोके प्रणमति यस्त्वां न पतति शोके ।
पारावारविहारिणि गंगे नरकपतितकृततरलापांगे ॥६ ॥

तव चेन्मातः स्त्रोतः स्नातः पुनरपि जठरे सोऽपि न जातः ।
नरकनिवारिणि जाह्नवी गंगे कलुष विनाशिनि महिमोत्तुंगे ॥७ ॥

हिमगिरि श्रृंगे लसित तरंगे जय जय जाह्नवी करूणापांगे ।
इन्द्रमुकुटमणिराजितचरणे सुखदे शुभदे भृत्यशरण्ये ॥८ ॥

रोगं शोकं तापं पापं हर मे भगवति कुमतिकलापम् ।
त्रिभुवनसारे वसुधाहारे त्वमसि गतिर्मम खलु संसारे ॥९ ॥

अलकानन्दे परमानन्दे कुरु करुणामयि कातरवन्द्ये ।
तव तटनिकटे यस्य निवासः खलु वैकुण्ठे तस्य निवासः ॥१० ॥

वरमिह नीरे कमठो मीनः किं वा तीरे शरटः क्षीणः ।
अथवा श्वपचो मलिनो दीनस्तव न हि दूरे नृपतिकुलीनः ॥११ ॥

भो भुवनेश्वरि पुण्ये धन्ये देवि द्रवमयि मुनिवरकन्ये ।
गंगास्तवमिममलं नित्यंपठति नरो यः स जयति सत्यम् ॥१२ ॥

इति श्रीशंकराचार्य विरचितं स्तोत्रं संपूर्णम्

# नर्मदाष्टकम्

सबिन्दुसिन्धुसुस्खलत्तरंग - भंगरंजितं

द्विषत्सुपापजातजातकादि वारिसंयुतम् ।

कृतान्तदूत कालभूत-भीति - हारिवर्मदे

त्वदीय - पादपंकजं नमामि देवि नर्मदे ॥१ ॥ ध्रुव

त्वदम्बुलीनदीनमीनदिव्यसमप्रदायकं

कलौ मलौघभारहारि सर्वतीर्थनायकम् ।

सुमच्छकच्छनक्रचक्र वाकचक्रशर्मदे

त्वदीय - पादपंकजं नमामि देवि नर्मदे ॥२ ॥

महागभीरनीरपूरपापधूतभूतलं

ध्वनत्समस्तपातकारिदारितापदाचलम् ।

जगल्लये महाभये मृकण्डुसूनुहर्म्यदे

त्वदीय - पादपंकजं नमामि देवि नर्मदे ॥३ ॥

गतं तदैव मे भयं त्वदम्बुवीक्षितं यदा

मृकण्डुसूनुशौनकासुरारिसेवितं सदा ।

पुनर्भवाब्धिजन्मजं भवाब्धिदुःखवर्मदे ।

त्वदीय - पादपंकजं नमामि देवि नर्मदे ।४ ॥

अलक्ष्यलक्षकिन्नरामरासुरादि पूजितं

सुलक्षनीरतीरधीरपक्षिलक्षकूजितम् ।

वसिष्ठशिष्टपिप्पलादि कर्दमादिशर्मदे ।

त्वदीय - पादपंकजं नमामि देवि नर्मदे ।५ ॥

सनत्कुमारनाचिकेतकश्यापात्रिषट्पदैः

धृतंस्वकीयमानसेषु नारदादिषट्पदैः ।

रवीन्दुरन्तिदेवदेवराजकर्मशर्मदे

त्वदीय - पादपंकजं नमामि देवि नर्मदे ॥६ ॥

अलक्षलक्षलक्षपापलक्ष सारसायुधं

ततस्तुजीवजन्तुतन्तुभुक्तिमुक्तिदायकम् ।

विरिञ्चिविष्णुशंकरस्वकीयधामवर्मदे

त्वदीय - पादपंकजं नमामि देवि नर्मदे ॥७ ॥

अहो धृतं स्वनं श्रुतं महेशकेशजा तटे

किरातसूतबाडबेषु पंडिते शठे नटे ।

दुरन्तपापतापहारि सर्वजन्तुशर्मदे

त्वदीय - पादपंकजं नमामि देवि नर्मदे ॥८ ॥

इदं तु नर्मदाष्टकं त्रिकालमेव ये सदा

पठन्ति ते निरन्त्वं न यान्ति दुर्गतिं कदा ।

सुलभ्यदेहदुर्लभं महेशधाम गौरवं

पुनर्भवा नरा न वै विलोकयन्ति रौरवम् ॥

इति श्रीशंकराचार्य विरचितं स्तोत्रं संपूर्णम्

# नर्मदा-स्तोत्रम्

नमस्तुभ्यं नर्मदायै ह्यनन्य - नत - मुक्तये ।
सुष्टु - शर्म - निदानायै नद्यै पुंमोहसंहृते ॥१ ॥

देवर्षि-दानवेड्यायै सूक्ष्मवस्तुदृशे नमः ।
वाक्यार्थायै सोमपुत्र्यै यातनानलशान्तये ॥२ ॥

नन्दायै नर्मदायै ते, नमः कर्मविशुद्धये ।
दयादमस्थैर्यकर्त्र्यै, संसिद्ध्यै देवतात्मने ॥३ ॥

सत्यसंप्राप्तिकारिण्यै, भूत्यै सन्तुष्टिहेतवे ।
रम्यायै तत्त्वरूपिण्यै, तपस्वचभ्यन्तरात्मने ॥४ ॥

स्वच्छस्वर्नद्यधि-स्वाम्बु-दमितत्रासिभीतये ।
तीव्रबाधाहृते पुंहृत्-तापघ्न्यै ते नमो नमः ॥५ ॥

सर्वापदाविमोक्षायै, त्रेधाधर्माङ्गमूर्तये ।
दानभूम्यै तपः सिद्ध्यै, यज्ञाढ्यै ते नमो नमः ॥६ ॥

रेवायै विषभीतिघ्न्यै, दिव्यायै षड्षिद्धृते ।
वासना - मोक्षदायै ते, नमश्चेतः समाधये ॥७ ॥

स्तुतायै नित्यदीप्तायै, बलिसर्पददुद्धृते ।
तितिक्षुशिव संधात्र्यै, भगवत्यै नमो नमः ॥८ ॥

श्रीनर्मदे-खिलमनोरथदेतिभद्रे भक्तार्तिनाशिनि विरिञ्चिसुरेन्द्रवन्द्ये ।
तीर्थेमले विपुलमंगलदानशीले सिद्धिप्रदे तवपदे प्रणमौमि नित्यम् ॥

# यमुनाष्टकम्

मुरारि-कायकालिमा-ललामवारि-धारिणी
तृणीकृत-त्रिविष्टपा-त्रिलोक-शोकहारिणी ।
मनोऽनुकूल-कूलकुञ्ज-पुञ्जधूतदुर्मदा
धुनोतु मे मनोमलं कलिन्दिनन्दिनी सदा ॥१ ॥

मलापहारि-वारिपूर-भूरिमण्डतामृता-
भृशं प्रपातक-प्रवञ्चनातिपण्डितानिशम् ।
सुनन्द-नन्दिनाङ्ग-सङ्ग-रागरञ्जिताहिता
धुनोतु मे मनोमलं कलिन्दिनन्दिनी सदा ॥२ ॥

लसत्तरङ्ग-सङ्गधूत-भूतजातपातका
नवीन-माधुरीधुरीण-भक्तिजात-चातका ।
तटान्तवासदासहंस-संसृताह्निकामदा
धुनोतु मे मनोमलं कलिन्दिनन्दिनी सदा ॥३ ॥

विहार-रास-खेदभेद-धीर तीर-मारुता
गतां गिरामगोचरे यदीयनीयचारुता ।
प्रवाहसाहचर्यपूत-मेदिनी-नदीनदा
धुनोतु मे मनोमलं कलिन्दिनन्दिनी सदा ॥४ ॥

तरङ्गसङ्ग-सैकताञ्चितान्तरा सदाऽसिता
शरन्निशाकरांशुमञ्जु-मञ्जरीसभाजिता ।
भवार्चनाय चारुणाम्बुनाधुना-विशारदा
धुनोतु मे मनोमलं कलिन्दिनन्दिनी सदा ॥५ ॥

जलान्त-केलिकारि-चारु-राधिकाङ्गरागिणी ।
स्वभर्तुरन्य दुर्लभाङ्गसङ्गताश भागिनी

स्वदत्त-सुप्तसप्तसिन्धु-भेदनातिकोविदा
धुनोतु मे मनोमलं कलिन्दिनन्दिनी सदा ॥६ ॥
जलच्युता-ऽच्युताङ्गराग-लम्पटालिशालिनी
विलोलराधिका-कचान्त-चम्पकालि-मालिनी ।
सदावगाहनावतीर्ण-भर्तृ भृत्यनारदा
धुनोतु मे मनोमलं कलिन्दिनन्दिनी सदा ॥७ ॥
सदैव नन्दिनन्दकेलिशालिकुञ्ज-मञ्जुला
तटोत्थफुल्लमल्लिका-कदम्बरेणुसूज्ज्वला ।
जलावगाहिनां नृणां भवाब्धिसिन्धुपारदा
धुनोतु मे मनोमलं कलिन्दनन्दिनी सदा ॥८ ॥

## अर्बुदाचल-स्तुतिः

अर्बुदाल पर्वताधिप दिव्यमूर्ते पाहि माम् ।
अद्भुताकृतिसुन्दरागम-गीतकीर्ते पाहि माम् ॥१ ॥

पार्वतीप्रियसोदरोत्तम पश्चिमाद्रे पाहि माम् ।
पद्मसंभव-संभवाश्रय श्रीविभूते पाहि माम ॥२ ॥

मानदण्डमुनीन्द्रतपसः सर्वसिद्धिवराकर ।
मंगलीकृत-शुष्कमरुभूः मौनमन्दिर पाहि माम् ॥३ ॥

विह्निरूपाचलमहेश्वर-दत्त-संपदलंकृत ।
ज्ञानकन्यकुमारिकाश्री-पादुकांचित पाहि माम् ॥४ ॥

सर्वजीवाभयद-कानन-सज्जितागकलेवर ।
सकलतीर्थाश्रय महाशय संविदालय पाहि माम् ॥५ ॥

यत्र नास्ति कलिप्रवेशः क्लेशनाशकरार्बुदे ।
तत् स्वयं शांभवसमावेशात्मभूमा राजते ॥६ ॥


गुरुस्तोत्राणि

# श्रीवेदव्यासाष्टकम्

कलिमलास्तविवेकदिवाकरं समवलोक्य तमोवलितं जनम् ।
करुणया भुवि दर्शितविग्रहं मुनिवरं गुरुव्यासमहं भजे ॥१ ॥

भरतवंशसमुद्धरणेच्छया स्वजननीवचसा परिनोदितः ।
अजनयत्तनयत्रितयं प्रभुः शुकनुतं गुरुव्यासमहं भजे ॥२ ॥

मतिबलादिनिरीक्ष्य कलौ नृणां लघुतरं कृपया निगमाम्बुधेः ।
समकरोदिह भागमनेकधा श्रुतिपतिं गुरुव्यासमहं भजे ॥३ ॥

सकलधर्मनिरुपणसागरं विविधचित्रकथासमलंकृतम् ।
व्यरचयच्च पुराणकदम्बकं कविवरं गुरुव्यासमहं भजे ॥४ ॥

श्रुतिविरोधसमन्वयदर्पणं निखिलवादिमतान्ध्यविदारणम् ।
ग्रथितवानपि सूत्रसमूहकं मुनिसुतं गुरुव्यासमहं भजे ॥५ ॥

यदनुभाववशेन दिवं गतः समधिगम्य महास्त्रसमुच्चयम् ।
कुरुचमूमजयद्विजयो द्रुतं द्युतिधरं गुरुव्यासमहं भजे ॥६ ॥

समरवृत्तविबोधसमीहया कुरुवरेण मुदा कृतयाचनः ।
सपदि सूतमदादलेक्षणं कलिहरं गुरुव्यासमहं भजे ॥७ ॥

वननिवासपरौ कुरुदम्पति सुतशुचा तपसा च विकर्शितौ ।
मृततनूजगणं समदर्शयन् शरणदं गुरुव्यासमहं भजे ॥८ ॥

व्यासाष्टकमिदं पुण्यं ब्रह्मानन्देन कीर्तितम् ।
यः पठेन्मनुजो नित्यं स भवेच्छास्त्रपारगः ॥९ ॥

# श्रीशंकरभगवत्पादस्तुतिः

अष्टवर्षे चतुर्वेदी द्वादशेखिलशास्त्रवित् ।
सर्वलोकख्यातशीलः प्रस्थानत्रयभाष्यकृत् ॥१ ॥

पद्मपादादि-सच्छिष्यः पाखण्डध्वान्तभास्करः ।
अद्वैतस्थापनाचार्यः द्वैतमत्तेभ-केसरी ॥२ ॥

व्यासनन्दितसिद्धान्तः वादनिर्जितमण्डनः ।
षण्मतस्थापनाचार्यः षड्गुणैश्वर्यमण्डितः ॥३ ॥

सर्वलोकानुग्रहकृत् सर्वज्ञत्वादिभूषणः ।
श्रुतिस्मृति-पुराणज्ञः श्रुत्येकशरणप्रियः ॥४ ॥

सकृत्स्मरणसन्तुष्टः शरणागतवत्सलः ।
निर्व्याज-करुणामूर्तिः निरहंभावगोचरः ॥५ ॥

संशान्त भक्तहृत्तापः सामरस्यफलप्रदः ।
संन्यासकुलपद्मार्कः संविन्मयकलेवरः ॥६ ॥

साक्षाच्छ्रीदक्षिणामूर्तिः शंकराख्यो जगद्गुरुः ।
सन्तनोतु दृढां निष्ठां अद्वैताऽध्वनि नः सदा ॥७ ॥

# श्रीगुरुशरणागतिस्तोत्रम्

विदिताखिल-शास्त्र-सुधा-जलधे महितोपनिषत्-कथितार्थनिधे ।
हृदये कलये विमलं चरणं भव शङ्कर देशिक मे शरणम् ॥१ ॥

करुणा-वरुणालय पालय मां भवसागरदुःखविदूनहृदम् ।
रचयाखिलदर्शनतत्त्वमिदं भव शङ्कर देशिक मे शरणम् ॥२ ॥

भवता जनता सुहिता भविता निजबोधविचारणचारुमते ।
कलयेश्वरजीवविवेकमिदं भव शङ्कर देशिक मे शरणम् ॥३ ॥

भव एव भवानिति मे नितरां समजायत चेतसि कौतुकिता ।
मम वारय मोहमहाजलधिं भव शङ्कर देशिक मे शरणम् ॥४ ॥

सुकृतेधिकृते बहुधा भवतो भविता समदर्शनलालसता ।
अतिदीनमिमं परिपालय मां भव शङ्कर देशिक मे शरणम् ॥५ ॥

जगतीमवितुं कलिताकृतयो विचरन्ति महामहसश्छलतः ।
अहिमांशुरिवात्र विभासिगुरो भव शङ्कर देशिक मे शरणम् ॥६ ॥

गुरुपुंगव-पुंगव-केतनते समता मयतां नहि कोपि सुधीः ।
शरणागतवत्सल तत्त्वनिधे भव शङ्कर देशिक मे शरणम् ॥७ ॥

विदिता न मया विशदैककला न च किञ्चन काञ्चनमस्ति गुरो ।
द्रुतमेव विधेहि कृपांसहजां भव शङ्कर देशिक मे शरणम् ॥८ ॥

(श्रीमत्तोटकाचार्य पूज्यपाद विरचितम्)

जय जय शङ्कर लोकगुरो जय जय शङ्कर भुवनगुरो ।
लीलाविग्रह-लोकगुरो भाष्यकार जय भुवनगुरो ॥

# श्री गुरुभजनस्तोत्रम्

कलाभिः कल्पिताशेष-भुवनानन्दभोजनम् ।
क्रीडन्तं त्रिपुरे नित्यं परसंविद्गुरूं भजे ॥१ ॥

हर्याकारं हराकारं ह्रींकारं वाम्बिकातनुम् ।
हृदयेद्वैतमात्मानं द्योतयन्तं गुरुं भजे ॥२ ॥

शिवप्रियं च रुद्राक्षं गले भाले त्रिपुण्ड्रकम् ।
करे सविन्मयीं मुद्रां धारयन्तं गुरुं भजे ॥३ ॥

काषायवसनोपेतं करुणार्द्रविलोचनम् ।
कामारिसेवनासक्तं कल्मषघ्नं गुरुं भजे ॥४ ॥

श्रितार्तिभेदनोद्युक्तं शर्मदं शमशोभितम् ।
श्रुत्यन्तवाक्यमनिशं श्रावयन्तं गुरुं भजे ॥५ ॥

संशयोच्छेदने दक्षं रक्षिताचार्यसन्ततिम् ।
स्वनाथ-करपाथोज-सञ्जातं सद्गुरू भजे ॥६ ॥

दीक्षितं शिष्यमोक्षार्थे साक्षात्कृतमहत्पदम् ।
दक्षिणामुखदेवाशं ब्रह्मनिष्ठं गुरुं भजे ॥७ ॥

ग्रन्थिं भित्त्वा विनिर्यान्तं वर्षन्तं गगनेमृतम् ।
कोटिविद्युत्प्रतीकाशं शक्तिपुञ्जं गुरुं भजे ॥८ ॥

जनयित्वा निजानन्दे रक्षित्वा मां क्षणे क्षणे ।
पाययन्तं भक्तिरसं मातृभूतं गुरुं भजे ॥९ ॥

अनन्यभावनागम्यं अभयं ज्योतिरान्तरम् ।
इच्छाज्ञानक्रियामूलं आत्मरूपं गुरुं भजे ॥१० ॥

देशिकेश्वरपश्वादि-भेदशून्यं चिदम्बरम् ।
देशकालानवच्छिन्नं निर्विकल्पं गुरुं भजे ॥११ ॥

मज्जन्मजन्मसाफल्यमहो जातमयत्नत: ।
यदंघ्रिरेणुसंस्पर्शात् तमानन्दं गुरुं भजे ॥१२॥

श्रीगुरुद्वादशात्मानं ध्यात्वा स्तोत्रमिमं पठेत् ।
साधकोत्तम: संविद्-दृष्टिसौष्ठवहेतवे ॥१३॥

## श्री शंकरकृतं गुरुपादुकापञ्चकम्

जगज्जनिस्थेम-लयालयाभ्यां, अगण्यपुण्योदयभाविताभ्याम् ।
त्रयीशिरोजातनिवेदिताभ्यां, नमो नम: श्रीगुरुपादुकाभ्याम् ॥१॥

विपत्तमस्तोमविकर्तनाभ्यां, विशिष्टसंपत्तिविवर्धनाभ्याम्
नमज्जनाशेषविशेषदाभ्यां, नमो नम: श्रीगुरुपादुकाभ्याम् ॥२॥

समस्तदुस्तर्ककलंकपंका-पनोदनप्रौढजलाशयाभ्याम् ।
निराश्रयाभ्यां निखिलाश्रयाभ्यां, नमो नम: श्रीगुरुपादुकाभ्याम् ॥३॥

तापत्रयादित्यकरार्दितानां, छायामयीभ्यामतिशीतलाभ्याम् ।
आपन्नसंरक्षणदीक्षिताभ्यां नमो नम: श्रीगुरुपादुकाभ्याम् ॥४॥

यतो गिरोप्राप्य धिया समस्ता, ह्रिया निवृता: सममेव नित्या: ।
ताभ्यामशेषाच्युतभाविताभ्यां नमो नम: श्रीगुरुपादुकाभ्याम् ॥५॥

श्रीपादुकापंचकमादरेण, पठन्ति नित्यं प्रयत: प्रभाते ।
तेषां गृहे नित्यनिवासशीला: श्रीदेशिकेन्द्रस्य कटाक्षलक्ष्मी ॥६॥

# श्रीशिवगुरु-स्तोत्रम्

संविद्रूपाय शान्ताय शंभवे सर्वसाक्षिणे ।
शेमुषी-सिद्धरूपाय शिवाय गुरवे नमः ॥१ ॥

त्रैलोक्यसंपदालेख्य-समुल्लेखनभित्तये ।
सच्चिदानन्दरूपाय शिवाय गुरवे नमः ॥२ ॥

देशकालानवछिन्न-दृष्टिमात्रस्वरूपिणे ।
देशिकौघत्रयान्ताय शिवाय गुरवे नमः ॥३ ॥

विश्वात्मने तैजसाय प्राज्ञाय परमात्मने ।
विश्वावस्थाविहीनाय शिवाय गुरवे नमः ॥४ ॥

विवेकिनां विवेकाय विमर्शाय विमर्शिनाम् ।
प्रकाशानां प्रकाशाय शिवाय गुरवे नमः ॥५ ॥

परतन्त्राय भक्तानां स्वतन्त्राय दयालवे ।
विद्यावतार देहाय शिवाय गुरवे नमः ॥६ ॥

पाशच्छेद-प्रवीणाय प्रपंचोपशमाय च ।
प्रणवाब्ज पतंगाय शिवाय गुरवे नमः ॥७ ॥

नवाय नवरूपाय नवनादविलासिने ।
निरंजनपदेशाय शिवाय गुरवे नमः ॥८ ॥

संविन्मुद्राय भद्राय सर्वविद्याप्रदायिने ।
संवित्सिंहासनस्थाय शिवाय गुरवे नमः ॥९ ॥

सर्वागमोक्तिकलितं स्तोत्रं शिवगुरोः परम् ।
संवित् साधन सारांशं यः पठेत् सिद्धिभाग् भवेत् ॥१० ॥

# गुरुमीडेस्तवरत्नम्

(श्री त्यागराज विरचित-स्तोत्रावलम्बित संकलनम्)

स्वप्रकाशशिवरूपसद्गरुं निष्प्रकाशजडचैत्यज्ञभासकम् ।
अप्रमेयसुगुणामृतालयं संस्मरामि हृदि नित्यमद्भुतम् ॥१ ॥

य: क्रीडार्थं विश्वमशेषं निजशक्त्या
सृष्ट्वा स्वस्मिन् क्रीडति देवोऽप्यनवद्य: ।
निस्त्रैगुण्यो मायिक भूमिव्यतिरिक्त:
तं सर्वाघध्वंसकमाद्यं गुरुमीडे ॥२ ॥

यद्भासार्को भाति हिमांशुर्दहनोवा
दृश्यैर्भास्यैर्यो न च भाति प्रियरूप: ।
यस्माद् भाति व्यष्टिसमष्टयात्मकमेतत्
तं सर्वाघध्वंसकमाद्यं गुरुमीडे ॥३ ॥

आशादेशाद्यव्यवधानो विभुरेक:
सर्वाधार: सर्वनियन्ता परमात्मा ।
आचार्येन्द्र: सत्त्ववतां यो हृदि देव:
तं सर्वाघध्वंसकमाद्यं गुरुमीडे ॥४ ॥

श्रौतै: स्मार्तै: कर्मशतैश्चापि य ईशो
दुर्विज्ञेय: कल्पशतैस्तैर्जडरूपै: ।
संविद्रूपस्वैकविचारादधिगम्य:
तं सर्वाघध्वंसकमाद्यं गुरुमीडे ॥५ ॥

यं जिज्ञासु: सद्गरुमुर्ति र्द्विजवर्य:
नित्यानन्दं तं फलपाणि: समुपैति ।
भक्तिश्रद्धादान्तिविशिष्टो धृतियुक्त:
तं सर्वाघध्वंसकमाद्यं गुरुमीडे ॥६ ॥

कोऽहं देवः किं जगदेतत् प्रविचाराद्
दृश्यं सर्वं नश्वररूपं गुरुवाक्यात् ।
सिद्धे चैवं यः खलु शेषः प्रतिपन्नः
तं सर्वाघध्वंसकमाद्यं गुरुमीडे ॥७ ॥

यच्छ्रोतव्यं श्रौतगिरा श्रीगुरुवाक्याद्
यन्मन्तव्यं स्वात्मसुखार्थं पुरुषाणाम् ।
यद्ध्यातव्यं सत्यमखण्डं निजरूपं
तं सर्वाघध्वंसकमाद्यं गुरुमीडे ॥८ ॥

द्यां मूर्धानं यस्य वदन्ति श्रुतयस्ताः
चन्द्रादित्यौ नेत्रयुगं ज्यां पदयुग्मम् ।
आशां श्रोत्रं लोमसमूहं तरुवल्यः
तं सर्वाघध्वंसकमाद्यं गुरुमीडे ॥९ ॥

प्राणायामैः पूतधियो यं प्रणवान्तं
संधायात्मन्यव्यपदेश्यं निजबोधम् ।
जीवन्मुक्ताः सन्ति दिशासु प्रचरन्तः
तं सर्वाघध्वंसकमाद्यं गुरुमीडे ॥१० ॥

सत्यं ज्ञानं ब्रह्मसुखं यं प्रणवान्तं
सर्वस्फूर्तिः शाश्वतरूपस्त्विति वेदाः ।
जल्पन्त्येवं स्वच्छधियोऽपि प्रभुमेकं
तं सर्वाघध्वंसकमाद्यं गुरुमीडे ॥११ ॥

सत्यागेशः सर्वगुहान्तः परिपूर्णो
वक्ता श्रोता वेदपुराण प्रतिपाद्यः ।
इत्थं बुद्धौ ज्ञानमखण्डं स्फुरदास्ते
तं सर्वाघध्वंसकमाद्यं गुरुमीडे ॥१२ ॥

ॐ

# वेदान्त स्तोत्राणि

# ब्रह्मविद्योपासना

निर्धूतनिखिलध्वान्ते नित्यमुक्ते परात्परे ।
अनुसदध्महे ब्रह्मविद्ये त्वां हृदयाम्बुजे ॥१ ॥

आद्याहन्ता-वृत्तिमात्रां पूर्णाहंभावभावुकाम् ।
अहंब्रह्मसंविदं त्वां आद्यांविद्यामुपास्महे ॥२ ॥

वेदागमशिशुक्रीड़ा - विनोदरसिकां शिवाम् ।
व्यासादि - श्रीगुरूपास्यां, विद्याम्बां त्वां उपास्महे ॥३ ॥

वीणाश्रुत्यन्त - नादान्त - शान्ततन्मात्रमातृकाम् ।
ताखिलदिगन्तां तां, परान्तां त्वां उपास्महे ॥४ ॥

ऐं ह्रीं श्रीं बीजरूपान्तां, ओंकारार्थ-स्वरूपिणीम् ।
उमाहैमवतीत्युक्तां, श्रुत्यन्ते त्वां उपास्महे ॥५ ॥

श्रीपादुका - महामन्त्र, सौधश्रृंगार - शारिकाम् ।
चतुः श्रुतिमहावाक्य - वाटिकान्तां उपास्महे ॥६ ॥

# विज्ञान-नौका

तपो-यज्ञ दानादिभि: शुद्धबुद्धिर्विरक्तो नृपादौ पदे तुच्छबुद्ध्या ।
परित्यज्य सर्व यदऽप्नोति तत्त्वं परंब्रह्म नित्यं वदेवाहमस्मि ॥१ ॥

दयालुं गुरुं ब्रह्मनिष्ठं प्रशान्तं समाराध्य मर्त्या विचार्य स्वरुपम् ।
यदाप्नोति तत्त्वं निदिध्यास्य विद्वान् परंब्रह्म नित्य तदेवाहमस्मि ॥२ ॥

यदानन्दरुपं प्रकाशस्वरुपं निरस्तप्रपञ्चं परिच्छेदशून्यम् ।
अहं ब्रह्मवृत्यैकगम्यं तुरीयं परब्रह्म नित्यं तदेवाहमस्मि ॥३ ॥

यदज्ञानतो भाति विश्वं समस्तं विनष्टं च सद्यो यदात्मप्रबोधे ।
मनोवागतीतं विशुद्धं विमुक्तं परंब्रह्म नित्यं तदेवाहमस्मि ॥४ ॥

निषेधे कृते नेति नेतीति वाक्यै: समाधिस्थितानां यदा भाति पूर्णम् ।
अवस्थात्रयातीतमेकं तुरीयं परंब्रह्म नित्यं तदेवाहमस्मि ॥५ ॥

यदानन्दलेश: समानन्ति विश्वं यदा भाति सत्त्वे तदा भाति सर्वम् ।
यदालोचने रूपमन्यत् समस्तं परंब्रह्म नित्यं तदेवाहमस्मि् ॥६ ॥

अनन्तं विभुं सर्वयोनिर्निरीहं शिवं सङ्गहीनं यदोङ्कारगम्यम् ।
निराकारमृत्युज्ज्वलं मृत्युहीनं परंब्रह्म नित्यं तदेवाहमस्मि ॥७ ॥

यदानन्दसिन्धौ निमग्न: पुमान् स्यादविद्याविलास: समस्तंप्रपञ्च: ।
तदा न स्फुरत्यद्भुतं यन्निमित्तं परंब्रह्म नित्यं तदेवाहमस्मि ॥८ ॥

स्वरुपानुसन्धानरूपां स्मृति य: पठेदादराद्भक्तिभावो मनुष्य: ।
श्रृणोतीह वा नित्यमुद्युक्तचितो भवेद् विष्णुरत्रैव वेदप्रमाणात् ॥९ ॥

विज्ञाननावं परिगृह्य कश्चित्तरेद्यदज्ञानमयं भवाब्धिम् ।
ज्ञानसिना यो हि विच्छिद्य तृष्णां विष्णो: पदं याति स एव धन्य ॥१० ॥

# धन्याष्टकम्

तज्ज्ञानं प्रशमकरं यदिन्द्रियाणां तज्ज्ञेय यदुपनिषत्सु निश्चितार्थम् ।
तेधन्या भुवि परमार्थनिश्चितेहा: शेषास्तु भ्रमनिलये परिभ्रमन्ति ॥१ ॥

आदौ विजित्य विषयान् मदमोह-राग-द्वेषादि-शत्रुगणमाहृतयोगराज्या: ।
ज्ञात्वाऽमृतं समनुभूयपरात्मविद्या: कान्तासुखा बत गृहे विचरन्तिधन्या ॥२ ॥

त्यक्त्वा गृहे रतिमतो गतिहेतुभूतामात्मेच्छयोपनिषदर्थरसं पिबन्त: ।
वीतस्पृहा विषयभोगपदे विरक्ता धन्याश्चरन्ति विजनेषु विरक्तसङ्गा: ॥३ ॥

त्यक्त्वा ममाऽहमिति बन्धकरे पदे द्वे मानावमानसदृशा: समदर्शिनश्च ।
कर्तारमन्यमवगम्य तदर्पितानि कुर्वन्ति कर्मपरिपाकफलानि धन्य: ॥४ ॥

त्यक्त्वैषणात्रयमवेक्षितमोक्षमार्गा भैक्ष्यामृतेन परिकल्पित-देहयात्रा: ।
ज्योति: परात्परतरं परमात्मसंज्ञं धन्या द्विजा रहसि हृद्यवलोकयन्ति ॥५ ॥

नासन्न सन्न सदसन्न महन्न चाणु न स्त्री पुमान्न च नपुंसकमेकबीजम् ।
यैर्ब्रह्म तत्समनुपासितमेकचित्तैर् धन्या विरेजुरितरे भवपाशबद्धा ॥६ ॥

अज्ञातपङ्कपरिमग्नमपेतसारं दु:खालयं मरण-जन्म-जरावसक्तम् ।
संसारबन्धनम् नित्यमवेक्ष्य धन्या ज्ञानासिना तदवशीर्य विनिश्चयन्ति ॥७ ॥

शान्तैरनन्यमतिभिर्मधुरस्वभावैरेकत्वनिश्चितनोभिरपेतमोहै: ।
साकं वनेषु विजितात्मपदस्वरुपै स्तद्वस्तु सम्यगनिशं विमृशन्ति धन्या: ॥८ ॥

अहिमिव जनयोगं सर्वदा वर्जयेद् य: कुणपमिव सुनारीं त्यक्तकामोविरागी
विषमिव विषयान्यो मन्यमानो दुरन्तान् जयति परमहंसे मुक्तिभावं समेति

सम्पूण जगदेव नन्दनवनं सर्वेऽपि कल्पद्रम:

गाङ्गं वारि समस्तवारिविह: पुण्या: समस्ता: क्रिया: ।

वाच: प्राकृतसंस्कृता: श्रुतिशिरो वाराणसी मेदिनी

सर्वावस्थितिरस्य वस्तुविषया दृष्टे परब्रह्मि ॥१० ॥

*(इति श्रीमत् शंकर भगवत्पादकृतं स्तोत्रं सम्पूर्णम्)*

# हस्तामलकस्तोत्रम्

## श्रीगुरुरुवाच

कस्त्वं शिशो कस्य कुतोसि गन्ता, कि नाम ते त्वं कुत आगतोसि ।
एतन् मयोक्तं वद चार्भक त्वं, मत्प्रीतये प्रीतिविवर्धनोसि ॥

## हस्तामलक उवाच

नाहं मनुष्यो न च देवयक्षौ, न ब्राह्मण-क्षत्रिय-वैश्य-शूद्राः ।
न ब्रह्मचारी न गृही वनस्थो, भिक्षुर्न चाहं निजबोधरुपः ॥
निमित्तं मनश्चक्षुरादिप्रवृतौ निरस्ताखिलोपाधिराकाशकल्पः ।
रविर्लोकचेष्टानिमित्तं यथा यः स नित्योपलब्धिस्वरुपोहमात्मा ॥१ ॥

यमग्नुष्णवन्नित्यबोधस्वरुपं मनश्चक्षुरादीन्यबोधात्मकानि ।
प्रवर्तन्त आश्रित्य निष्कम्पमेकं स नित्योपलब्धिस्वरुपोहमात्मा ॥२ ॥

मुखाभासको दर्पणे दृश्यमानो मुखत्वात् पृथक्त्वेन नैवास्ति वस्तु ।
चिदाभासको धीषु जीवोपि तद्वत् स नित्यो . ॥३ ॥

यथा दर्पणाभाव आभासहानौ मुखं विद्यते कल्पनाहीनमेकम् ।
तथा धीवियोगे निराभासको यः स नित्यो . ॥४ ॥

मनश्चक्षुरादेर्वियुक्तः स्वयं यो मनश्चक्षुरादेर्-मनश्चक्षुरादिः ।
मनश्चक्षुरादेरगम्यस्वरुपः स नित्यो. ॥५ ॥

य एको विभाति स्वतः शुद्धचेताः प्रकाशस्वरुपोपि नानेव घीषु ।
शरावोदकस्थो यथा भानुरेकः स नित्यो. ॥६ ॥

यथानेकचक्षुः प्रकाशो रविर्न क्रमेण प्रकाशीकरोति प्रकाश्यम् ।
अनेका धियो यस्तथैकः प्रबोधः स नित्यो. ॥७ ॥

विवस्वत्प्रभातं यथा रुपमक्षं प्रगृह्णाति नाभातमेवं विवस्वान् ।
यदाभातं आभासयत्यक्षमेकः स नित्यो . ॥८ ॥

यथा सूर्य एकोप्स्वनेकश्चलासु स्थिरास्वप्यनन्तद्विभाव्यस्वरूपः ।
चलासु प्रभिन्नासु धीष्वेक एव स नित्यो . ॥९ ॥

घनच्छन्नदृष्टिर् घनच्छन्नमर्कं यथा निष्प्रभं मन्यते चातिमूढः ।
तथा बद्धवद्भाति यो मूढदृष्टेः स नित्यो . ॥१० ॥

समस्तेषु वस्तुष्वनुस्युतमेकं समस्तानि तस्तूनि यंनस्पृशन्ति ।
वियद्वत् सदा शुद्धमच्छस्वरुपं स नित्यो . ॥११ ॥

उपाधौ यथा भेदता सन्मणीनां तथा भेदता बुद्धिभेदेषु तेपि ।
यथा चन्द्रिकाणां जले चंचलत्वं तथा चंचलत्वं तवापीह विष्णो ॥१२ ॥

# निर्वाणषट्कम्

मनोबुद्ध्यहंकारचित्तानि नाहं
न कर्ण न जिह्वा न च घ्राणनेत्रे ।
न च व्योम भूमिर्न तेजो न वायु -
श्चिदानन्दरूप: शिवोऽहं शिवोऽहम् ॥१ ॥

न च प्राणसंज्ञो न वै पञ्चवायु-
र्न वा सप्तधातुर्न वा पञ्चकोश: ।
न वाक् पाणिपादौ न चोपस्थपायू
चिदानन्दरूप: शिवोऽहं शिवोऽहम् ॥२ ॥

न मे द्वेषरागौ न मे लोभमोहौ
मदो नैव मे नैव मात्सर्यभाव: ।
न धर्मो न चार्थो न कामो न मोक्ष-
श्चिदानन्दरूप: शिवोऽहं शिवोऽहम् ॥३ ॥

न पुण्यं न पापं न सौख्यं न दु:खं
न मन्त्रो न तीर्थ न वेदा न यज्ञा: ।
अहं भोजनं नैव भोज्यं न भोक्ता
चिदानन्दरूप: शिवोऽहं शिवोऽहम् ॥४ ॥

न मृत्युर्न शङ्का न मे जातिभेद:
पिता नैव मे नैव माता च जन्म ।
न बन्धुर्न मित्रं गुरुर्नैव शिष्य-
श्चिदानन्दरूप: शिवोऽहमं शिवोऽहम् ॥५ ॥

अहं निर्विकल्पो निराकाररूपो
विभूत्वाच्च सर्वत्र सर्वेन्द्रियाणाम् ।
न चासंगतं नैव मुक्तिर्न बन्ध-
श्चिदानन्दरूप: शिवोऽहं शिवोऽहम् ॥६ ॥

# ब्रह्मज्ञानावलीमाला

सकृच्छ्रवणमात्रेण ब्रह्मज्ञानं यतो भवेत् ।
ब्रह्मज्ञानावलीमाला सर्वेषां मोक्षसिद्धये ॥१ ॥

असंगोऽहमसंगोऽहं असंगोऽहं पुनः पुनः ।
सच्चिदानन्दरूपोऽहं अहमेवाहमव्ययः ॥२ ॥

नित्यशुद्धविमुक्तोऽहं निराकारोऽहमव्ययः ।
भूमानन्दस्वरूपोऽहं अहमेवाहमव्ययः ॥३ ॥

नित्योऽहं निरवद्योऽहं निराकारोऽहमच्युतः ।
परमानन्दरूपोऽहं अहमेवाहमव्ययः ॥४ ॥

शुद्धचैतन्यरूपोऽहं आत्मारामोऽहमेव च ।
अखण्डानन्दरूपोऽहं अहमेवाहमव्ययः ॥५ ॥

प्रत्यक्चैतन्यरूपोऽहं शान्तोऽहं प्रकृतेः परः ।
शाश्वतानन्दरूपोऽहं अहमेवाहमव्ययः ॥६ ॥

तत्त्वातीतः परात्माहं मध्यातीतः परः शिवः ।
मायातीतः परंज्योतिः अहमेवाहमव्ययः ॥७ ।

नानारूपव्यतीतोऽहं चिदाकारोऽहमच्युतः ।
सुखरूपस्वरूपोऽहं अहमेवाहमव्ययः ॥८ ॥

मायातत्कार्यदेहादि मम नास्त्येव सर्वदा ।
स्वप्रकाशैकरूपोऽहं अहमेवाहमव्ययः ॥९ ॥

गुणत्रयव्यतीतोऽहं ब्रह्मादीनां च साक्ष्यहम् ।
अनन्तानन्तरूपोऽहं अहमेवाहमव्ययः ॥१० ॥

अन्तर्यामिस्वरूपोऽहं कूटस्थः सर्वगोऽस्म्यहम् ।
परमात्मस्वरूपोऽहं अहमेवाहमव्ययः ॥११ ॥

निष्कलोऽहं निष्क्रियोऽहं सर्वात्माद्यः सनातनः ।
अपरोक्षस्वरूपोऽहं अहमेवाहमव्ययः ॥१२ ॥

द्वन्द्वादिसाक्षिरूपोऽहं अचलोऽहं सनातनः ।
सर्वसाक्षिस्वरूपोऽहं अहमेवाहमव्ययः ॥१३ ॥

प्रज्ञानघन एवाहं विज्ञानघन एव च ।
अकर्ताहं भोक्ताहं अहमेवाहमव्ययः ॥१४ ॥

निराधारस्वरूपोऽहं सर्वाधारोऽहमेव च ।
आप्तकामस्वरूपोऽहं अहमेवाहमव्ययः ॥१५ ॥

तापत्रयविनिर्मुक्तो देहत्रयविलक्षणः ।
अवस्थात्रयसाक्ष्यस्मि चाहमेवाहमव्ययः ॥१६ ॥

दृग्दृश्यौ द्वौ पदार्थौ स्तः परस्परविलक्षणौ ।
दृग्ब्रह्म दृश्यं मायेति सर्ववेदान्तडिण्डिमः ॥१७ ॥

अहं साक्षीति यो विद्याद् विविच्यैवं पुनः पुनः ।
स एव मुक्तः सो विद्वान इति वेदान्तडिण्डिमः ॥१८ ॥

घटकुड्यादिकं सर्वं मृत्तिकामात्रमेव च ।
तद्ब्रह्म जगत्सर्वम् इति वेदान्तडिण्डिमः ॥१९ ॥

ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः ।
अनेन वेद्यं सच्छस्त्रां इति वेदान्तडिण्डिमः ॥२० ॥

अन्तर्ज्योतिर्बहिर्ज्योतिः प्रत्यग्ज्योतिः परात्परः ।
ज्योतिर्ज्योतिः स्वयंज्योतिः आत्मज्योतिः शिवोऽस्म्यहम् ॥

श्रीशंकरभगवत्पादाचार्य - रचिता ब्रह्मज्ञानावलीमाला संपूर्णा

# श्री गुरु-वन्दना

(श्री शंकरभगवद्पाद शिष्य श्रीसुरेश्वर विरचित)

स्मारं स्मारं जनिमृतिभयं जातनिर्वेदवृत्तिः
ध्यायं ध्यायं पशुपतिमुमाकान्तमन्तर्निषण्णम् ।
पायं पायं सपदि परमानन्द-पीयूषधाराम्
भूयो भूयो निजगुरुपदाम्भोजयुग्मं नमामि ॥१ ॥

यस्माद् विश्वमुदेति यत्र निवसत्यन्ते यदप्येति यत्
सत्यज्ञानसुखस्वरूपमवधि-द्वैत-प्रणाशोज्झितम् ।
यज्जाग्रत्स्वप्न-प्रसुप्तिषु विभात्येकं विशोकं परम्
प्रत्यग् ब्रह्म तदस्मि यस्य कृपया तं देशिकेन्द्रं भजे ॥२ ॥

विश्वानन्द - तुषार - सिंधुरखिलज्ञानस्फुलिंगानलः
प्रच्छन्नासिलता च कोशकुहरे द्वैतभ्रमच्छेदिनी ।
मोहध्वान्तविभाकरः परिलसन् वेदान्तसीमन्तिनी
मौलिस्थानमणिः सदा विजयते संविन्मयः पूरुषः ॥३ ॥

गीता च हृदयं वर्म तथा नामसहस्रकम् ।
स्तोत्राणि चेति पंचांगं देवतोपासने स्मृतम् ।।
कवचं देवतागात्रं गीता तु देवता शिरः ।
हृदयं हृदयं प्रोक्तं मुखं साहस्रकं स्मृतम् ।।
स्तोत्राणि देवतापादौ पंचांगं पंचभिः स्मृतम् ।।

प्रत्येक उपास्य देवता के सम्बन्ध में गीता, हृदय, कवच, सहस्रनाम और स्तोत्र-पाँच प्रकार का साहित्य है, जिसका पाठा तत्तद्देवता-उपासना के अंगरूप में करने का शास्त्रीय विधान है। ''कवच'' मन्त्र तो देवता का शरीर माना गया है, ''गीता'' शिरोभाग है, ''हृदय'' देवता का हृदयस्थान है, ''सहस्रनाम'' मुखारविन्द है। विविध स्तोत्रों को देवता के चरण समझना चाहिए। इस प्रकार इन पाँच साहित्यरूपों से उपास्य देवता के पंचांग सिद्ध होने से, इनके सेवन के द्वारा उपासना सम्पूर्ण एवं तेजस्वी होती है - ऐसी शास्त्रीय मान्यता है।

Ph. 515130